विशिष्टप्रवचनमालायाः

द्वितीयं पुष्पम्

बौद्धदर्शनबिन्दुः

प्रवक्ता

डाक्टरसातकडिमुखोपाध्यायः

वाराणसेयसंस्कृतविश्वविद्यालयः

संवत् २०२१

विशिष्टप्रवचनमालायाः

द्वितीयं पुष्पम्

बौद्धदर्शनबिन्दुः

प्रवक्ता

डाक्टरसातकड़िमुखोपाध्यायः

नालन्दास्थपालिशोधसंस्थानसंचालकचरः ।

वाराणसेयसंस्कृतविश्वविद्यालयः

संवत् २०२१

प्रवचन-सूची[1]

शून्यवादविमर्शः ... ... १—१९
२२–१२–६०
विज्ञानवादविमर्शः ... ... २०—३७
२३–१२–६०
बौद्धन्यायविमर्शः ... ... ३८—५१
२४–१२–६०

१. इमानि प्रवचनानि वाराणसेयसंस्कृतविश्वविद्यालयस्य तृतीयदीक्षान्तसमारोहावसरे विदुषा लेखकेन प्रदत्तानि ।

शून्यवादविमर्शः

श्रीरामकृष्णाङ्घ्रिसरोजयुग्मे
पीयूषमत्युत्तममस्त्यदभ्रम् ।
तुच्छेन्द्रियार्थान् प्रविहाय तस्मिन्
गाढं पिबन्मज्जतु चित्तभृङ्गः ॥ १ ॥

सत्यानन्दं नमस्कृत्य ध्यात्वा तत्पादपङ्कजम् ।
प्रवर्ते दुःखसाध्येऽर्थे स मामुत्तारयिष्यति ॥ २ ॥

विद्यागुर्वोः पदद्वन्द्वे श्रीयोगेन्द्रसुरेन्द्रयोः ।
नत्वा पुनः पुनर्माध्यमिके किञ्चिद्वदाम्यहम् ॥ ३ ॥

क्वाहं मन्दमतिः क्वेदं दुर्बोधं बौद्धदर्शनम् ।
साहसं चापलं चोभे स्यातां प्रकटिते मुहुः ॥ ४ ॥

तथापि भूमिदेवानां विदुषां प्रत्ययो मम।
अवष्टभ्नाति चेतः स्यात् साफल्यं तदनुग्रहात्॥ ५॥

ये प्राज्ञाः शास्त्रवेत्तारस्ते नाऽस्या विषयः कृतेः।
ये त्वकृतश्रमाः शास्त्रे तेषां कृते ममोद्यमः॥ ६॥

अयि भो उपकुलपतिमहोदय! गवेषणाध्यक्षचट्टोपाध्यायमहाभाग! विद्वत्तल्लजाः शास्त्ररहस्यवेत्तारः प्रवक्तारश्च!

फल्गुप्रायेऽप्यस्मिन् प्रबन्धे कृपया भवद्भिरवधानं दीयमानमभ्यर्थये। विदित-वेदितव्यानामत्रभवतां न किमपि तिरोहितमविदितचरञ्च वस्तु पुरत उपस्थापयितुं समर्थोऽयं जनः। तथापि विदितेऽपि शास्त्ररहस्ये तस्मिन्नन्यदीयः प्रयत्नः कमपि रसमनुभावयति शास्त्ररसिकान्। अतः कथमयं वक्ता शास्त्रव्याख्यामनुतिष्ठेदिति कुतूहलावेशेन कौतुकानुबुभूषया वा भवन्तोऽत्र प्रस्तूयमाने प्रबन्धे दत्तचित्ता भविष्यन्तीति सम्प्रत्ययः प्रोत्साहयति मामस्मिन् दुष्करे कर्मणि। उक्तञ्च जयन्तभट्टेन—

असंख्यैरपि नात्मीयैः स्वल्पैरपि परस्थितैः।
गुणैः सन्तः प्रहृष्यन्ति चित्रमेषां विचेष्टितम्॥ इति।

(न्यायमञ्जरी, पृ० २)

प्रकृतचिन्तनं प्रस्तौमि।

शून्यवादस्य प्ररूपणं प्रज्ञापारमितादिषु माहायानिकागमेषु तत इतो विप्रकीर्णं दृश्यते। तथापि शास्त्रकारोचितशैल्या तत्प्रतिपादनाभावात् तेभ्यस्तत्त्वनिश्चयो न सुखसम्पादन इति महामतिर्नागार्जुनाचार्यः परप्रवादिनां मतानि पूर्वपक्षविधया समुपन्यस्य तेषां च युक्तिसम्प्रहारिद्र्यं पदे पदे प्रकाशयन् शून्यवाद एव भगवता सुगतेन प्रतिपिपादयिषित इति सिद्धान्तं प्रतिष्ठापयितुकामो माध्यमिककारिकेति नाम्ना प्रामाणिकं शास्त्रं प्रणिनाय। नागार्जुनसन्दब्धं शास्त्रं बहुभिर्व्याख्यातृभिर्व्युत्पादितम्। परन्त्वतीव खेदस्थानमेतद् यत्केवलं चन्द्रकीर्तिप्रणीता प्रसन्नपदानाम्नी वृत्तिरद्यत्वे समुपलभ्यते। ततश्चेदं प्रतीयते यदाचार्यभावविवेकेन प्राक् काचन महार्था वृत्तिर्व्यरचि। सा च स्वातन्त्रिक-माध्यमिकवादस्य आकरः समजनि। भावविवेकाचार्येण आचार्यबुद्धपालितस्य व्याख्यां

क्रियासमभिहारेण दूषयता स्वमतं प्रतिष्ठापितम्। एते चान्ये च मूलग्रन्था विलोपं गताः। केवलं भोटभाषायां तेषां छाया उपलभ्यन्ते। किं बहुना, आचार्यनागार्जुनस्य स्वोपज्ञा अकुतोभया नाम वृत्तिरपि कालवैशसं प्राप्ता दुनोति तन्मतजिज्ञासूनां चित्तम्। भोटभाषायां कृताभियोगैरपि प्रतिबिम्बमात्रदर्शनेन न तृप्तिरासाद्यते। नहि निपुणतमेनापि शिल्पिना निर्मिता प्रतिकृतिर्बिम्बस्थानमधिकर्तुमुत्सहते। यथा तथा भवतु नाम चन्द्रकीर्तिकृता वृत्तिः प्रसन्नपदेति सार्थकं नामधेयं बिभ्रती मूलकारिकार्थानुसन्धाने सुमहदानुकूल्यं पदे पदे प्रयच्छति। भावविवेकादस्य खलु वैषम्यमनुमानशैलीमधिकृत्य। भावविवेकस्तु सांव्यवहारिकं प्रमाणमुररीकृत्य स्वमतं स्थापयामास, परमतं च निराचक्रे। चन्द्रकीर्तिः पुनः प्रसङ्गानुमानं पुरस्कृत्य परमतखण्डनेन कृतार्थम्मन्यः समभूत्। प्रसङ्गानुमानञ्च न्यायाभिमतप्रतिकूलतर्कस्यैव संज्ञान्तरमात्रम्। तच्च परमतदूषणे प्रागल्भ्यमियर्ति। स्वमतञ्च न किमपि निगमयति तत्स्वरूपाभावादेव। ईदृशमेव वादिनं न्यायशास्त्रे वैतण्डिकं प्रतियन्ति तान्त्रिकाः।

अस्य शास्त्रस्य प्राचीनेतिवृत्तवर्णनं नात्यन्ताय प्रस्तुतोपयोगीति कृत्वा इतिवृत्तविमर्शकेषु तादृशं कृत्यभारं निक्षिप्य नागार्जुनस्य तदनुगामिनाञ्च दार्शनिकविचारशैलीमधुना वर्णयितुमुपक्रमामहे। बहुभिः सुधीभिरिहत्यैः प्रतीच्यैः प्राच्यैश्च जापानदेशवास्तव्यैः पराक्रान्तं चात्र विषये। तेषाञ्च व्याख्यानेषु बहुमुखी विप्रतिपत्तिर्दृष्टचरी आयासयति विविदिषूणां चेतांसि। बहवः खलु सम्प्रतितना मनीषिण एतं शून्यवादसिद्धान्तं विधिमुखेन व्याचक्षते। प्राचीनास्तु ग्रन्थकाराः सौगतेतरे सौगतमतानुयायिनश्च एनं निषेधमुखेनैव व्यावर्णयन्ति। अतीव कौतुकस्थानमेतद्यत् किमपि नागार्जुनस्य वचनं भावभूतशून्यवादप्रमापकं नोपस्थाप्यते केनापि भावपक्षपातिनाधुनिकविदुषा। एतत्तु उपरिष्टादवदातीकरिष्यते।

ग्रन्थारम्भे प्रतीत्यसमुत्पादमुपदिष्टवते भगवते सम्बुद्धाय नमस्कृत्य प्रतीत्यसमुत्पाददर्शनमेव प्रपञ्चोपशमहेतुरित्यभिदधत् प्रतीत्यसमुत्पादं कार्यकारणभावापरपर्यायं परीक्षमाण आचार्यः—

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन॥ (मू० म० १।१)

इति कारिकामुपन्यस्यति। समासेन खलु एतस्याः कारिकाया अयं निष्कृष्टार्थः—सांख्याभिमते सत्कार्यवादे कार्यस्य कारणात्मना सत एवाभिव्यक्तिरिति भङ्ग्यन्तरेण स्वहेतुकमेव कार्यं प्रतिज्ञायते, तन्निगदव्याख्यानेनैव निराकृतम्। नहि पौर्वापर्यघटितः कार्यकारणभावस्तयोरभेदं ख्यापयति। तदेव पूर्वमपरञ्चेति विप्रतिषिद्धम्। एतदेव उपोद्बलयता चन्द्रकीर्तिना—

तस्माद्धि तस्य भवने न गुणोऽस्ति कश्चि-
ज्जातस्य जन्म पुनरेव च नैव युक्तम्॥

(म० वृ० पृ० १३)

इति विपक्षबाधकं प्रमाणमुपन्यस्तम्। सांख्यस्तु असत्कार्यवादे बह्वीरनुपपत्तीः प्रदर्शयन् अनायत्या सत्कार्यवादं परिशेषयति। परन्तु सोऽपि पक्षो न विप्रतिपत्तेर्निर्मुक्तः। विद्यमानस्य कार्यस्य पुनरुत्पादने कर्तृव्यापारो निरर्थको भवेत्। अथ अनभिव्यक्तस्याभिव्यक्तिसम्पादने कर्तृव्यापारसाफल्यमिति मनीषितम्, तदपि न हृदयमावर्जयति। अभिव्यक्तिः कार्याभिमतादभिन्ना चेत्, तथाविद्यमानपूर्वा चेत्, तदा कार्यमिव सती अभिव्यक्तिर्न पुरुषव्यापारमपेक्षेत। अथ परस्मादेवाविद्यमानपूर्वमेव कार्यं भवतीति पक्षस्तथापि कार्यकारणसम्बन्धानुपपत्तिः। तथा हि—परत्वाविशेषे तिलेभ्यस्तैलं न सिकताभ्य उत्पद्यत इति नियमानुपपत्तिरविहता। अथ स्वपरपक्षयोः प्रतिस्वं कार्यकारणभावानुपपत्त्या उभयोः समुदितयोरेव कारणभावः कल्प्येत, तदा प्रत्येकपक्षाभिहितदोषो वज्रलेपायेत। अथाऽहेतुतः कार्यमुत्पद्यतामिति स्वभाववादिनश्चार्वाकस्य मतमुपादीयेत तदापि न निस्तारः, कादाचित्कस्य कार्यस्य हेतुनिरपेक्षस्य विप्रतिषिद्धत्वात्। अहेतुकं कार्यं सदैव भवेद् हेत्वनपेक्षणात्, कदापि वा न भवेदसत्त्वात्। एवं समासेन सर्वप्रवादिमतसिद्धं कार्यकारणभावं प्रत्याचक्षाणाः कादाचित्कस्य कार्यस्य निःस्वभावत्वमेव प्रख्यापयन्ति माध्यमिकाः। कार्यं सत् सर्वदैवेति सांख्याः। कार्यं सदेव पूर्वमसदपीति नैयायिकाः। उभयोरपि कार्यस्य स्वभावतः सत्तायां सम्प्रतिपत्तिः। माध्यमिकस्य तु उभयत्रापि बलवती विमतिः। यदि सत्ता कार्यस्य स्वभावः, कार्यं कदापि न सत्तां जह्यात्। नहि असत्सद्भवितुमर्हति, तथात्वे सदसद्विवेकहानात्। न हि स्वभावतः सन् पदार्थः कदाप्यसन् भवेत्, स्वभावस्यानपायित्वात्। यत् सत्तत्सदेव यदसत्तदसदेव। नहि वस्तु कदाचित् सत् कदाचिचा-

सद्भवितुं क्षमते, सत्त्वासत्त्वयोः सामानाधिकरण्यासम्भवात्। न वा कालभेदेनासत्सद्भवेत् सद्वाऽसद्भवेत्, यथा घटः कपालेष्वसन्नपि पश्चात् सत्तां लभते प्रध्वंसानन्तरमसत्तामुपयातीति नैयायिकानां पक्षमपि न समुचितं मन्यन्ते माध्यमिकाः। नहि कालेन वस्तुस्वभावोऽन्यथा कर्तुं शक्यते। न वा पराभिमतमाकाशं कालभेदेन सत्तामसत्तां वा भजमानं दृश्यते। न च आमघटः श्यामः सन् पश्चादापाके पक्वो रक्ततामुपैति, न च रूपभेदेन घटस्य तादात्म्यहानिः, प्रत्यभिज्ञानादिति वाच्यम्; यदि घटस्य श्यामत्वं स्वभावो न कदाप्यसौ रक्तो भवेत्, यदि स्वभावेन रक्तो न कदाप्यरक्तः स्यादिति तर्कस्य दुरुत्तरत्वात्।

एतामेव युक्तिमवष्टभ्य वस्तुनः क्षणिकत्वं सिद्धान्तयति क्षणभङ्गवादी। तस्य मते यत्सत्तत्क्षणिकमिति निर्व्यूढैव व्याप्तिः। सत्ता चार्थक्रियाकारिता। 'अर्थः' कार्यं तस्य 'क्रिया' सम्पादनं तत्कारित्वमेव सत्त्वं प्रतिज्ञातम्। वस्तु कारणं भवति, कारणञ्च कार्यायोगव्यवच्छेदि। नहि कार्यकरणशक्तावप्रतिहतायां कार्यस्यानुत्पत्तिः सम्भविनी, समर्थस्य क्षेपायोगात्। यत्समर्थं तत्करोत्येव, सामर्थ्यकरणयोः समनैयत्यात्। नहि नित्यः पदार्थ एतन्मते समस्ति, नित्यस्य क्रमाक्रमाभ्यामर्थक्रियाविरहात्, अर्थक्रियारहितस्य च सत्त्वायोगात्। न चानित्यो भवतु क्षणिको मा भूदिति वाच्यम्, क्षणिकत्वाक्षणिकत्वाभ्यां सर्वं सत्त्वं व्याप्तम्। यदि क्षणिको न स्यादक्षणिको भवेत्, अक्षणिको न स्यात्क्षणिको भवेत्, राश्यन्तराभावात्। परस्परविरुद्धयोरेकतरनिषेधोऽन्यतरविधिनान्तरीयकः। अक्षणिकश्चासन्निति क्षणिकत्वपक्ष एव सत्तायाः पर्यवसानमिति संक्षेपेण सौत्रान्तिकसिद्धान्तः प्रतिपादितो विस्तरभीरुभिरस्माभिः।

अर्थक्रियाकारित्वमेव सत्त्वम्। न च वस्तु किञ्चिदक्षणिकमुपपद्यत इति सौत्रान्तिकेन माध्यमिकस्यैकवाक्यता, परन्तु कारणत्वमेव सत्त्वमिति सौत्रान्तिकमतविमर्दे पर्यवस्यति। कारणञ्च निःस्वभावं दर्शितं माध्यमिकेन। अतोऽर्थक्रियासामर्थ्यमेव सत्त्वमिति प्रतिजानानाः सौत्रान्तिकादयोऽपहस्तिताः। न केवलमत्र युक्तिः, अपि तु आगमा अपि बहवः कार्यकारणभावस्य मृषात्वं स्वारसिकतया प्रतिपादयन्ति। अथ यदि स्वतः परत उभयतोऽहेतुतश्च नास्ति भावानामुत्पादस्तर्हि "अविद्याप्रत्ययाः संस्काराः" इति कथं प्रतीत्यसमुत्पादस्योपदेशो भगवता कृत इति

चेत्, संवृत्येति गृहाण। संवृतिश्चाविद्या। अभिधानाभिधेयकार्यकारणादिलोक-व्यवहारोऽविद्यया एव प्रवर्तते। तदपोहनार्थं भगवता विनेयजनाशयानुरोधेन तथा तथोपदेशः प्रदत्तः, अविद्यावासनानिवृत्त्यर्थम्। नहि एकपद एव लोकस्य तत्त्वावतारः संभवतीति लोकव्यवहारसिद्धेन प्रमाणादिना तत्त्वोपदेशः कृतो मार्गावताराय। इमे च सूत्रान्ता नेयार्थाः। ये सूत्रान्ताः फलावताराय निर्दिष्टास्त उच्यन्ते नीतार्था यत्र शून्यतायाः साक्षादुपदेशः। एवं सर्ववाह्यवस्तूनां प्रतीत्यसमुत्पन्नत्वान्मृषात्वं प्रतिपादितम्।

अथ वैभाषिकादिपरिकल्पितानां पदार्थानां प्रमाणविरोधान्निःस्वभावत्वं तत्तदध्यायेषु प्रतिपादितं महता संरम्भेण। न च सर्वेषां परीक्षणमत्र संभवति, उपयुज्यते वा। तथाप्यकृतग्रन्थपरिचयानां कुतूहलोत्पादनार्थं विषयगुरुत्वं चापेक्ष्य केषाञ्चित्परीक्षणमत्र प्रस्तूयते। स्थालीपुलाकन्यायेन तावतैव नागार्जुनस्य विचार-परिपाटीं परिचिनुयाद् व्युत्पित्सुः प्रेक्षावान्। यथा हि नैयायिकानां मते न किमपि वस्तु निर्धर्मकं संभवति, लक्षणप्रमाणाभ्यां च वस्तुसिद्धिर्भवति, एवं वैभाषिकाणामपि सलक्षणमेवाभिमतं सर्वं वस्तु। तथा हि शास्त्रे पृथिव्यप्तेजोवाय्वाकाशविज्ञानाख्याः षड्धातवो वैभाषिकैरङ्गीकृताः। शालिस्तम्बादिसूत्रेषु तेषां निरूपणं विस्तरेणोप-लभ्यते। तत्राकाशमनावरणलक्षणमुच्यते। एवं पृथिव्यादीनां काठिन्यादिकं लक्षणमुपदिष्टं शास्त्रे। लक्षणसद्भावादाकाशादीनां स्वभावः स्वीकरणीय इति वैभाषिस्य पक्षे स्थिते लक्ष्यलक्षणाभावं परीक्षत आचार्यनागार्जुनः। अलक्षणं चेदाकाशादिकं तत् खपुष्पायितमिति वैभाषिकस्य पक्षः। लक्ष्याल्लक्षणं भिन्नमभिन्नं वा? आद्ये लक्षणं सलक्षणे वा प्रवर्तेत अलक्षणे वा? तत्र सलक्षणे लक्षणस्य प्रवृत्तेः कैमर्थक्यं स्पष्टम्, नहि लक्षणद्वयमुपलभ्यत उपयुज्यते वा। तथा चैकेन लक्षणेन यत् क्रियते द्वितीयेनापि लक्षणेन यदि तदेव क्रियेत तर्हि पिष्टपेषणवदनर्थकं स्याद् द्वितीयं लक्षणम्। अथालक्षणे लक्षणस्य प्रवृत्तिरभ्युपगम्यते, तदाऽवस्तुन्येव लक्षणस्य प्रवृत्तिरूरीकर्तव्या। अलक्षणं च वस्तु खपुष्पसममुक्तम्—

> अलक्षणो न कश्चिच्च भावः संविद्यते क्वचित्।
> असत्यलक्षणे भावे क्रमतां कुह लक्षणम् ॥ इति।
>
> (मू० म० ५।२)

तथा च सलक्षणेऽलक्षणे वा लक्षणस्य प्रवृत्त्यसम्भवान्नहि लक्षणेन वस्तु-सिद्धिः। असाधारणधर्मो हि लक्षणमुच्यते। तेन च सजातीयविजातीयव्यवच्छेदेन निर्लुठितगर्भतया वस्तुस्वरूपं परिचायितं भवति। दृष्टा च लक्ष्याल्लक्षणस्य भेदे तयोः सम्बन्धानुपपत्तिः। अथ लक्ष्यलक्षणयोरनन्यत्वमभ्युपेयते तदा लक्षणरहितमेव वस्तु विस्पष्टं कथितम्। लक्षणाभावाच्च दृश्यमात्रस्यावस्तुत्वं निःस्वभावत्वं चावसितं भवति। किञ्च, स्वभाव एव न संभवति कस्यचित्। तथा हि—उपलभ्यमानं वस्तु यदि सस्वभावं भवेत् तर्हि न तस्य हेतुप्रत्ययापेक्षा। स्वभावेन विद्यमानानां हेतुप्रत्ययैर्न कोऽप्यतिशयः सम्पादयितुं शक्यो यथा वर्तमानानां घटाङ्कुरादीनां भूयो निष्पत्तये न हेतुप्रत्ययापेक्षा विद्यमानत्वादेव हेतोः। एवं यद्यन्येऽपि भावाः स्वोत्पत्तेः प्राग् विद्यमानाः स्युस्तदा तुल्यन्यायेन हेतुप्रत्ययनिरपेक्षा भवेयुस्ते। अथास्वभावस्यापि प्रागविद्यमानस्य पश्चात् कारकव्यापारात् स्वभावप्रतिलम्भस्तदा स्वभावः कृतक एव भवेत्। अथ कृतकस्यैव स्वभावस्याभ्युपगमान्न कृतकत्वप्रसङ्गोऽस्माकमनिष्ट इति प्रत्यवस्थीयेत, तदपि न हृदयङ्गमम्, यतः—"स्वभावः कृतको नाम भविष्यति पुनः कथम्" (मू० म० १५।२)। कृतकः स्वभावश्चेति परस्परं विरुद्धम्। यस्त्वकृतको धर्मः स एव स्वभावो यथा अग्नेरौष्ण्यम्। कृतकश्चापामौष्ण्यवन्न स्वभावो भवितुमर्हति। तर्हि भवत्वग्नेरौष्ण्यमपां शैत्यं स्वभाव इति कुतो निःस्वभावत्वं भावानां त्वदभिमतं सिध्येदित्यपि प्रत्यवस्थानमयुक्तम्। संवृतिमादाय कृत्वा चिन्तया अज्ञव्युत्पादनार्थमुदाहरणं दत्तम्। वस्तुतस्तु अग्न्यादीनामपि न सस्वभावत्वं सिद्धम्, तेषां मणीन्धनादित्यरश्मिसंयोगादुत्पत्तेः। न चाग्निव्यतिरिक्तमौष्ण्यम्। संवृतिमाश्रित्यैव परमार्थोपदेशः संभवति। अन्यथा अविद्यातिमिरोपहतमतिनयनानामविद्यातो निष्क्रमणं न संभवेत्। यत्त्वभिधर्मे वस्तूनां स्वलक्षणं सामान्यलक्षणं चोपदिष्टं तत्सांवृतं स्वरूपमभिप्रेत्यैव, औष्ण्यमग्नेरन्यत्रानुपलब्धमसाधारणं रूपं सत् स्वमेव लक्षणमिति कृत्वा। एवं साधारणमनित्यत्वादिकं सामान्यलक्षणम्। यदा त्वविद्यातिमिरापगमे प्रज्ञाचक्षुरुन्मीलति विनेयस्य तदा—"नायं स्वभावो भावानाम्" (म० वृ० पृ० २६१) इत्युपदिश्यते।

भवतु हेतुप्रत्ययसम्भूतस्याग्न्यादेरौष्ण्यादिकं हेतुप्रत्ययसंभूतत्वेन कृतकत्वाविशेषान्निःस्वभावम्। तर्हि किं पुनरिदानीं स्वभावस्य लक्षणं विवक्षितम्?

"अकृत्रिमः स्वभावो हि निरपेक्षः परत्र च" (मू० म० १५।२) इति गृह्यताम्। स्वो भावः स्वभाव इत्युच्यते। स चाकृत्रिमः। यच्च यस्य स्वायत्तं तत्तस्यात्मरूपम्। यच्चाग्न्यादेः कालत्रयेऽप्यव्यभिचारि रूपं तत्स्वभाव इति व्यपदेशमर्हति। किमयं स्वभावोऽग्न्यादेरस्तीति वा नास्तीति वा न वक्तुमर्हम्। परमार्थतस्त्वनिर्वाच्यत्वेऽपि विनेयानामुत्त्रासपरिहारार्थं धर्माणां धर्मता स्वभाव इत्युच्यते। स च स्वभावः शून्यतेति नैःस्वाभाव्यमिति तथतेति च व्यपदिश्यते। तथता च तथाभावोऽविकारित्वं सदैव स्थायिता सर्वदानुत्पादः। ईदृशश्च स्वभावो भावानां नोपलभ्यते। स च स्वभावो वाङ्मनसयोः पन्थानमतिक्रम्यैव वर्तते। परमार्थतस्तु —"स चैष भावानामनुत्पादात्मकः स्वभावोऽकिञ्चित्त्वेनाभावमात्रत्वादस्वभाव एवेति कृत्वा नास्ति भावस्वभाव इति विज्ञेयम्" (म० वृ० पृ० २६५)।

न च भावस्य प्रतिषेधेऽभावो न प्रतिषिध्यते। तस्मादभावसद्भावे सिद्धे भावोऽपि सेत्स्यति प्रतिद्वन्द्वित्वात्, भावमपेक्ष्यैवाभावस्य प्रतीतिसम्भवात्। नहि प्रतियोग्यनुयोगिभ्यामनिरूपितोऽभावः कस्यापि बुद्धिगोचरो भवेत्। अतोऽभावसिद्धौ भावसिद्धिर्नान्तरीयका। अस्मिन्नाक्षेपे माध्यमिकस्य समाधानम् — भावस्यासिद्धयुद्भावनेन तद्विपरीतस्याभावस्याप्यप्रसिद्धिरधिकरणसिद्धान्तविधया समापतति, यावता "भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः" (मू० म० १५।५) इति भावस्यैवान्यथाभावमापन्नस्याभावव्यपदेशाद्भावाऽभावेऽभावोऽपि सुतरामसिद्धः। ये तु वैभाषिकादयो बुद्धवचनाविपरीतव्याख्यातृमानिनो भावमभावं स्वभावं परभावं चाभ्युपगच्छन्ति, ते न बुद्धवचनस्य रहस्यमधिगतवन्तः। तथा हि—वेदनाया विषयानुभवो विज्ञानस्य विषयप्रतिविज्ञप्तिः स्वभाव इत्येवं स्वभावं भावानां वर्णयन्ति। अन्यद्विज्ञानमन्यद्रूपमिति परभावं वर्णयन्ति। विज्ञानादिकञ्च अतीताध्वानं प्राप्तमभाव इति प्रतिपादयन्ति। न ते परमगम्भीरस्य प्रतीत्यसमुत्पादस्य तत्त्वं परिचिन्वन्ति। स्वभावपरभावादीनामस्तित्वमुपपत्तिविरुद्धं प्रख्यापितमेव। कथं वोपपत्तिविरुद्धं पदार्थस्वभावं प्रतिपादयेयुस्तथागताः। भगवद्वचनं प्रमाणमिति प्रतिज्ञाय तत्रोपपत्तिविरोधमुपेक्षमाणा गजनिमीलिकामाचरन्तो वैभाषिकादयः कथमुपादेयवचना भवेयुः। भगवता च भावाभावविभाविना भावाभावप्रतिषेधः समुपदिष्टः। तथा च किं तत्त्वमिति प्रश्ने रत्नकूटसूत्रे—"अस्तीति काश्यप अयमेकोऽन्तो नास्तीति काश्यप अयमेकोऽन्तः।

यदेनयोर्द्वयोरन्तयोर्मध्यं तदरूप्यमनिदर्शनमप्रतिष्ठमनाभासमनिकेतमविज्ञप्तिकमियमुच्यते काश्यप मध्यमा प्रतिपद्धर्माणां भूतप्रत्यवेक्षा" (म० वृ० पृ० २७०) इति। तथा च अस्तित्वनास्तित्वतदुभयानुभयपक्षविवर्जितं शून्यत्वमेव तत्त्वमिति प्रतिपादितं माध्यमिकैः। उक्तञ्च प्राग् यदग्न्यादीनां स्वभावतोऽस्तित्वं नास्ति। तदभावान्नास्तित्वमपि न सद्भवितुमर्हति यथा वैशेषिकादयः सप्तपदार्थवादिनः सङ्गिरन्ते। यद्यस्तित्वं वस्तुनः स्वभावः स्यान्न कदाचित्तस्य नास्तिता सम्भवेत्। दृश्यते च हेतुप्रत्ययसम्भूतानां कादाचित्कं नास्तित्वम्। अतस्तेषां निःस्वभावत्वं बलादापद्यते। स्वभावास्तित्ववादिनां दर्शने शाश्वतवादो दुष्परिहारः प्रसज्यते। "नास्तीदानीमभूत्पूर्वमित्युच्छेदः प्रसज्यते" (मू० म० १५।११)। उभयोरपि वादयोर्वैतथ्यं कण्ठरवेणाघोषितं भगवता।

ननु भावानां स्वभावो नास्तीत्यभ्युपगच्छतां माध्यमिकानां मा भूच्छाश्वतदर्शनम्, उच्छेददर्शनं त्ववर्जनीयं तैरिति चेत्? उच्यते—नैवाभावदर्शनं माध्यमिकानामापादयितुं शक्यम्। यः पूर्वं भावस्वभावमभ्युपगच्छन् पश्चात्तन्निवृत्तिमाचष्टे स पूर्वोपलब्धस्वभावापवादादुच्छेददृष्टिर्भवेत्। माध्यमिकैस्तु न किञ्चिदुपलभ्यते। अत किं निषिध्येत। केवलं विपर्यस्तानां मिथ्याग्राहनिवृत्त्यर्थं न सन्ति सर्वभावा इति निषेधमुखेन तत्त्वावतारार्थं प्रवचनं क्रियते। विज्ञानवादिनस्तु परतन्त्र-परिकल्पित-परिनिष्ठित-स्वभावाभ्युपगमेन अन्तद्वयपरिहारं प्रत्याययन्ति। तथा हि—परतन्त्रचित्तचैत्तमुपगम्य परिकल्पितस्वभावाभावादस्तित्वदर्शनं परिजिहीर्षन्ति। संक्लेशव्यवदाननिबन्धनस्य परतन्त्रस्य च सद्भावमातिष्ठन्ते। ते च परिकल्पितस्यापवादान्नास्तित्वदर्शनात्परतन्त्रस्य चास्तित्वाभ्युपगमादस्तित्वदर्शनान्न निर्मुच्यन्ते। हेतुप्रत्ययजनितस्य परतन्त्रस्य सस्वभावत्वायोगात्तदस्तित्वप्रतिपादनं तेषामानुपपत्तिकं दर्शनं गमयति। यदि पुनः परतन्त्रस्यापि लोकसंवृतिसिद्धत्वं कृत्वा चिन्तयाभ्युपगतमिति मन्यते, तदापि परिनिष्ठितस्य सर्वकालं विद्यमानत्वाङ्गीकारात् शाश्वतदर्शनमपरिहरणीयमेव। माध्यमिकदर्शनमेव अस्तित्वनास्तित्वपक्षपरिहारात् शाश्वतोच्छेददर्शनाभ्यामकलङ्कितं तत्त्वं प्रतिपादयति, न विज्ञानवादादिदर्शनमिति कण्ठगर्जनेन प्रतिपादयति चन्द्रकीर्तिः (म० वृ० पृ० २७५)। एतेनैव सांख्यमतमौलूक्यमतं वैशेषिकमतं निर्ग्रन्थमतं साम्मितीयपुद्गलवादश्च प्रत्याख्यातानि वेदितव्यानि। ननु तर्हि

विज्ञानादिवाददेशनायाः का गतिरिति चेत् ? नेयार्थत्वेन परमार्थदर्शनस्योपायभूतत्वात्ते वादा विनेयजनाशयानुरोधाद्भगवता तत्र तत्रावारिताः। न च तेषां परमार्थतत्त्वपरत्वमारेकणीयम्।

भवन्तु निःस्वभावा भावाः। भाववदभावोऽपि निःस्वभावो भवतु। कथं तर्हि "अभावाः सर्वधर्माः शून्याः सर्वधर्माः" इति प्रज्ञापारमितावचनम् (म० द० पृ० २७८) उपपद्येत। उच्यते—अध्यारोपापवादन्यायेन विवक्षितं भावं प्रतिषेध्याऽभाव इति व्यपदेशः। परमार्थतस्तु शून्यतैव तत्त्वम्। सा च नोत्पद्यते न वा निरुध्यत इति कृत्वा भावाभावादिचतुष्कोटिविनिर्मुक्ततत्त्वप्रतिपादने तद्वचनस्य तात्पर्यमवसातव्यम्।

नैरात्म्यवादः

अधुना सर्वसौगतसम्प्रदायविद्भिरङ्गीकृतो नैरात्म्यवादो विचारार्थं प्रस्तूयते। सांख्यन्यायवैशेषिकादिप्रतिपादितात्मवादे बौद्धानां बलवती विप्रतिपत्तिः। आत्मवादं सत्कायदृष्टिसमुद्भूतं कल्पनामात्रसिद्धमित्यातिष्ठन्ते एकवाक्यतया सर्वे सौगतमतानुसारिणः। यद्यपि तेषां परमार्थतत्त्वविषये मिथो विप्रतिपत्तयः स्थवीयस्य उपलभ्यन्ते, परस्परमतखण्डने च महता संरम्भेणोद्यच्छन्ति शाक्यपुत्रीयाः, निर्वाणस्वरूपे च तेषां विमतयः प्रसृमरा दरीदृश्यन्ते, तथापि नित्यः कूटस्थः परिणामी वा अखण्ड आत्मा नास्तीति सर्वेषामेव सिद्धान्तः। नास्माभिः सौगतानां परस्परमात्मस्वरूपभेदप्रतिपादने मतवैषम्यं विचारणीयमस्मिन् प्रस्तावे ग्रन्थविस्तरपरिजिहीर्षया। माध्यमिकमतमेवात्मनः सत्त्वासत्त्वप्रतिपादने समुत्कर्षकाष्ठां भजते। तन्मते च प्रतिपादिते मतान्तराणि निरवकाशीकृतानि भविष्यन्ति। तन्मतविचारश्चास्माभिः प्रस्तुतः। आत्मस्वरूपविचारात्प्राक् प्रश्नोऽयं समुदेति कथं भगवता बुद्धेनात्मनास्तित्वप्रतिपादने एतावान् प्रयत्नः समास्थितः। किंनिबन्धनश्चात्मप्रद्वेष इति। आत्मा चाहंकारममकारनिबन्धनम्, तन्मूलाश्च रागद्वेषादयः क्लेशास्तद्धेतुकश्च संसारः प्रवर्तते घटीयन्त्रवदनिशमित्यात्मस्नेहनिवारणार्थं नैरात्म्योपदेशः। आत्मन्यसति न तस्मिन् रागो न वा तदनुकूलेषु प्रणयस्तत्प्रतिकूलेषु द्वेषः। आत्माभावे ते ह्युच्छिन्नमूलत्वात् समूलघातं निहता भवन्ति। परन्तु नहीच्छामात्रेण प्रयोजनापेक्षया वा वस्तुनोऽसत्त्वं प्रमाणसिद्धं भवति। तस्मादात्मनस्तत्त्वपरीक्षायां प्रारब्धं तन्मतानुसारिभिर्दार्शनिकरीत्या। रूपवेदना-

संज्ञासंस्कारविज्ञानरूपाः पञ्च स्कन्धा एवात्मत्वेनाभिमन्यन्तेऽविद्यावशंवदैः। स्कन्धेभ्यश्चात्मा पार्थगर्थ्येन नोपलभ्यते। न चाहङ्कारविषय एवात्मेति मन्तव्यम्। तथात्वे संसारानुच्छेदप्रसङ्गः। रूपं तावद् बाह्यशरीरारम्भकं सर्वेषामेव प्रत्यक्षसिद्धम्, वेदना सुखाद्यनुभवात्मिका, संज्ञा च घटत्वपटत्वादिनिमित्तग्रहणात्मिका, घटपटादिविषयश्च विज्ञानमध्यात्ममध्यक्षेणावसीयन्ते। समुदाचरद्वृत्तयो रागद्वेषादिक्लेशोपक्लेशाः संस्काराख्याः सर्वेषामनुभवसिद्धाः। ये च वासनात्मकाः संस्कारास्तेऽपि कार्यान्यथानुपपत्त्या नापह्नोतुं शक्यन्ते। एत एव प्रत्येकमनेकत्वात् स्कन्धा इति व्यपदिश्यन्ते। रूपव्यतिरिक्ताः स्कन्धा आत्मनो गुणा इति वैशेषिकाः, अन्तःकरणधर्माश्चेति सांख्याः। यथा तथा भवतु नाम, एतैर्गुणैर्विरहितो न कश्चिदनुगामी आत्मपदार्थः प्रत्यक्षगोचर इति बौद्धानामाशयः। आत्मनि यद्यपि विवादस्तद्धर्माभिमतेषु स्कन्धादिषु न कस्यचिदपि वैमत्यम्। कस्तावत्स्कन्धानामात्मना सम्बन्धः। यदि तेऽभिन्ना भवेयुः स्कन्धवदुदयव्ययभाग् भवेदात्मा। न चैतदिष्यते केनाप्यात्मवादिना। तर्हि न स्कन्धा आत्मा भवन्ति। आत्मा स्कन्धव्यतिरिक्तो भवतु का हानिरिति चेत्? उच्यते—यदि स्कन्धेभ्यो भिन्न आत्मा स्यान्न स्कन्धलक्षणो भवेत्। स्कन्धाश्चोत्पादस्थितिभङ्गलक्षणयुक्तास्तद्व्यतिरिक्तश्चात्मा उत्पादादिविरहितः सन् नित्यो भवेत्। भावश्च नित्यो न संभवति। अतः स्कन्धव्यतिरिक्त आत्मा खपुष्पवदलीक एव भवेत्। अथवा स्कन्धलक्षणानाक्रान्त इष्यमाण आत्मा पृथग् लक्षणवान् यद्यभविष्यत्तदा तथैवोपालप्स्यत। न चोपलभ्यते, अत आत्मा केवलमविद्यातिमिरोपहतबुद्धिभिः कल्प्यमानो न तत्त्वतो व्यवतिष्ठते। तस्मात् स्कन्धेभ्यो भेदाभेदाभ्यामनुपपद्यमानो नास्तीत्यध्यवसातव्यः। केवलं स्कन्धानुपादायाहंकारः प्रवर्तमान आत्मग्राहं विवेकशून्यानां दृढीकरोति। आत्मा च स्वप्नमरीचिसदृशोऽहंकारममकारौ द्रढयन् संसारमविच्छिन्नं प्रवर्तयति। योगी चात्मानमपश्यन्निर्ममो निरहङ्कारः सम्पद्यमानो निर्वाणमधिगच्छति। परमार्थतस्तु शून्यतादर्शिनोऽपि न सद्भावः। तथा चोक्तम्—"न विद्यते सोऽपि कश्चिद्यो भावयति शून्यताम्" (म० वृ० पृ० ३४८) इति। एवञ्च ममेत्यहमिति विकल्पे क्षयं प्राप्ते सत्कायदृष्टिप्रहाणात् कामदृष्टिशीलव्रतात्मवादरूपमुपादानचतुष्टयमनायासं प्रहीयते। एवञ्च कर्मक्लेशक्षयात् शून्यतायां पर्यवस्यति विवेकी।

अथ यदि आत्मनास्तित्वमेव तत्त्वं सुगतस्य प्रतिपिपादयिषितं भवेत्तदा—

आत्मा हि आत्मनो नाथः को नु नाथः परो भवेत् ।
आत्मना हि सुदान्तेन स्वर्गं प्राप्नोति पण्डितः ॥
....
आत्मा हि आत्मनः साक्षी कृतस्यापकृतस्य च ॥
(म० वृ० पृ० ३५४)

इति बुद्धवचनं कथं न व्याहन्येत ? इत्याक्षिप्ते आत्मानङ्गीकारेऽन्यान्यपि वचनान्यात्मप्रतिक्षेपपराण्युदाहरति वृत्तिकारः । तथा हि—"नास्तीह सत्त्व आत्मा वा धर्मास्त्वेते सहेतुकाः । रूपं नात्मा रूपवान्नापि चात्मा रूपे नात्मा नात्मनि रूपम्"(म० वृ० पृ० ३५५) इत्यपि भगवता प्रतिपादितं किं न रोचयेः । अन्योन्यविरोधश्च नाविपरीततत्त्वदर्शिनि सुगते शास्तरि संभाव्यत इत्यन्यथैवास्याभिप्राय उन्नेतव्यः ।

अस्य च गूढाभिप्राय इत्थं निरूपितश्चन्द्रकीर्तिना । लोकायतिकाः खलु देहातिरिक्तमात्मानमपह्नुवानाः परलोकमनभ्युपयन्तो देहावसानेनैवात्मनो निवृत्तिमाचक्षते । ते चोच्छेदवादिनः । तन्मतनिराकरणार्थमात्मास्तित्वोपदेश आगमेषु तत्र तत्रोपलभ्यते । ये पुनः सद्भूतात्मदर्शिनो नित्यमात्मानमातिष्ठन्ते तेषां शाश्वतदृष्टिप्रहाणार्थमात्मनास्तित्वमपि प्रतिपादितम् । वस्तुतस्तु बुद्धैरात्मा वा अनात्मा वा नोपदिष्टः । एतस्यैवावष्टम्भकमागमवाक्यं विस्तरेणोपन्यस्तम् । अनन्तरम्—

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम् ॥ (मू० म० १८।६)

इति नागार्जुनवचनं पुरस्कृत्य सर्वं प्रतीयमानं वस्तुजातं निःस्वभावं गन्धर्वनगरमायामरीचिस्वप्नवत्कल्पनानिर्मितं प्रतीतिमात्रसारं परमार्थतोऽलीकमिति सिद्धान्तं निगमयति । यथा बाह्यवस्तुजातं नास्ति, एवमात्मापि, एवं स्कन्धा अपि, एवं क्लेशा अपि, एवं व्यवदानमपि मृषास्वभावम् । किं बहुना संसारनिर्वाणयोरपि न कश्चिदवस्तुत्वे भेदः । तथागतोऽपि, तदनुशिष्टं शास्त्रमपि, सर्वं तैमिरिककल्पितकेशोण्डुकवन्मोघस्वभावं प्रत्यपीपदत् । सर्वञ्च भ्रान्त्या तथा तथा प्रतिभासते । अविद्याप्रभावासादितप्रत्ययगोचराः सर्वे भावा निःस्वभावाः । सा चैव भ्रान्तिरसत्ख्यातिरूपा न किमप्यधिष्ठानमाश्रित्य प्रवर्तते, अधिष्ठानस्याभावान्निःस्वभावत्वमविशिष्टमेव ।

आत्मनोऽसत्त्वे तत्त्वज्ञानेन निश्चिते सद्भावे च प्रतिषिद्धेऽहंकारममकारक्षयात् स्वत एव निर्वाणमधिगतं भविष्यतीति माध्यमिकस्य नैरात्म्यवादोपपादनम्। निर्वाणस्वरूप-पर्यालोचनेन चायमेव सिद्धान्तः सुदृढभूमिकायां प्रतिष्ठितो भविष्यति। एतावता प्रपञ्चेन विप्रतिपत्त्यनवकाशेन सिद्धमेतत्तत्त्वं यत्सर्वं मायामात्रं यत्किञ्चिद् वस्तुत्वेन प्रतीतिगोचरो भवति। नात्र किञ्चिद्भावात्मकं वस्तु प्रतिष्ठां लभते। चन्द्रकीर्तिप्रति-पादितं नागार्जुनवचनोपबृंहितमागमादिभिः पौनःपुन्येन निरवकाशवचनैश्च भूयसा संरम्भेण प्रतिपादितं भावाभावकोटिद्वयासंस्पर्शि शून्यत्वमेव सर्वभावनैःस्वाभाव्यापर-पर्यायं बलात्कारेणान्यथाकर्तुमशक्यं माध्यमिकस्य चरमराद्धान्तभूतं प्रतिपन्नं भवति।

निर्वाणम्

अधुना निर्वाणस्वरूपं माध्यमिकसम्मतं विचारार्थं प्रस्तूयते। यदि सर्वं शून्यं क्लेशादयोऽपि शून्याः स्युः संसारोऽपि शून्यो भवेत्। तर्हि कस्य प्रहाणाद्वा निरोधाद्वा निर्वाणमधिगम्येत। निर्वाणस्याप्यसत्त्वे सर्वं बुद्धशासनं वैकल्यं जुषेत। अयं तावत्सर्वसौगतसमयप्रविष्टानां सिद्धान्तो यत्खलु निरवशेषस्याविद्या-रागादिक्लेशस्य प्रहाणात् सोपधिशेषनिर्वाणमधिगम्यते तत्त्वज्ञानिभिः। उपधिश्च पञ्चोपादानस्कन्धाः, उपधीयतेऽस्मिन्नात्मस्नेह इति व्युत्पत्त्या। स च शिष्यते यस्मि-न्निर्वाणे तत्सोपधिशेषं जीवन्मुक्त्यपरपर्यायं निर्वाणमुच्यते। स्कन्धपञ्चकमात्रं सत्कायदृष्ट्यादिक्लेशतस्कररहितमत्रावशिष्यते। एतच्च निहताशेषचौरगणग्रामेणो-पमेयं भवति। देहान्ते परिनिर्वाणे स्कन्धमात्रमपि नास्ति। अत एव निर्गत उपधिशेषः अस्मादिति व्युत्पत्त्या एतन्निरुपधिशेषं निर्वाणमुच्यते। एतच्च निहताशेषचौरगणस्य ग्रामस्यापि विनाशेनोपमीयते। पूर्वत्र स्कन्धमात्रे स्थितेऽपि सत्कायदृष्ट्यादिविरहाद् जीवन्मुक्तस्य संसारसत्यताभ्रान्तिः पुनर्नोपजायते। द्वितीये च निर्वाणे सत्कायदृष्टि-विषयतायोग्यस्य स्कन्धपञ्चकस्यापि विरहात् सर्वथा जन्ममरणप्रपञ्चस्य समूलघातं प्रतिहतिर्भवति। तथा चोक्तम्—"प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः" (म० वृ० पृ० ५२५) इति निरुपधिशेषनिर्वाणस्य विवरणम्। एतच्च निर्वाणद्वयं यथाक्रमं क्लेशानां स्कन्धानाञ्च प्रहाणादुपपद्यते। यदि पुनर्न कश्चिद्धर्म उत्पद्यते न वा निरुध्यते तदा कथं क्लेशानां प्रहाणम्, कथन्तरां वा स्कन्धानां निरोधः सम्भवेत्।

तदभावे च निर्वाणमसंभवदुक्तिकं भवेत्। तस्मान्निर्वाणोपपत्त्यर्थं क्लेशादीनां प्राक्सत्त्वमुररीकरणीयम्। तेषाञ्च खपुष्पवदसत्त्वे निर्वाणमपि निःस्वभावं स्यात्। इष्यते च निर्वाणमसंस्कृतम्। एवं पूर्वपक्षिणा कृताक्षेपे शून्यवादिनः प्रतिवन्दी-विधया पर्यनुयुञ्जते। यदि क्लेशाः स्कन्धाश्च स्वभावतो विद्येरन् तर्हि स्वभावसतां तेषां कथं वा निरोधः सम्भवेत्। नहि स्वभावतः सन् पदार्थोऽसत्तामुपेयात्। तेषां निःस्वभावत्वे एव निरोध उपपन्नो भवेत्। अभ्युपगम्यैतदुच्यते। नहि सतो वा निरोधः संभवति, असतश्च निरोधोऽसंभवी अप्रयोजनश्च। नह्यसतो वन्ध्यापुत्रस्य निरोधः केनापि शक्यक्रियः। कीदृशं तर्हि निर्वाणं माध्यमिकस्य सम्मतम्? उच्यते—

अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतम्।
अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते॥ (मू० म० २५।३)

अयं च निष्कर्षः—न हि निर्वाणं प्रहीयते, न वा प्राप्यते, नाप्युच्छिद्यते, नापि नित्यं सदभिव्यज्यते, नापि निरुध्यते, नाप्युपपद्यते। एवंभूतं हि निर्वाणं निष्प्रपञ्च-मूरीक्रियते। क्लेशस्कन्धादीनां निरोधस्तु कल्पनामात्रम्, केवलमविद्यान्धितप्रज्ञा-चक्षुषां प्रज्ञप्त्यर्थं तादृशी कल्पना आगमेषु प्रतीयते। आह—यद्यपि निर्वाणे न सन्ति स्कन्धाः क्लेशा वा, तथापि तदधिगमात् प्राक् तेषां सद्भावोऽवश्यमङ्गीकरणीयः, येषां परिक्षयान्निर्वाणमधिगंस्यते, इतरथा निर्वाणमिति पदमर्थशून्यं प्रसज्येत। उच्यते—यदि क्लेशाः स्वभावतो विद्यमाना अभविष्यन् न तेषामभावः शक्यसम्पादनः समज-निष्यत। अतो निर्वाणप्रेप्सुना ईदृशी कल्पना दूर एव त्यक्तव्या। उक्तञ्च पुनः पुनः प्रसङ्गमापाद्य संसारस्य शून्यत्वं क्लेशादीनां निःस्वभावत्वञ्च। अतः परमार्थविचारे संसारनिर्वाणयोर्न किञ्चिदन्तरम्। सर्वथा सुस्थितमेतद्यन्निर्वाणे न कस्यचित्प्रहाणं न वा कस्यचिन्निरोधः, सर्वथा यावदसद्भूतकल्पनापरिक्षयलक्षणं निर्वाणमवसितं भवति। यथा खल्वन्धकारे रज्जुसर्पस्य प्रदीपोदयादनुपलब्धिरेवं क्लेशादिलक्षणस्य प्रज्ञोदयादनुपलम्भ एव निर्वाणम्। नहि रज्जुसर्पस्यान्धकारावस्थायां स्वरूपतः सत्त्वमासीदिति केनापि स्वस्थमतिना कल्पयितुं शक्यम्। एवं संसारावस्थायां क्लेश-कर्मादीनामपि परमार्थसद्भावो न कल्पनीयः। कथं तर्हि संसार इत्युच्यते, केवलं भ्रान्त्या आत्मात्मीयग्राहानुरोधाद्बालपृथग्जनानामसन्तोऽपि भावाः सत्त्वेन प्रतिभा-सन्ते, यथा तैमिरिकाणामसन्तः केशकलापाः। अत एव निर्वाणमस्तीति नास्तीति

वा कल्पनाया अगोचरे वर्तते। अस्तीति तावत्तीर्थिकानां स्वयूथ्यानां वैभाषिकाणाञ्च, नास्तीति लोकायतिकादीनां केषाञ्चन श्रावकयानीयानां चाभिमानः। विज्ञानवादिनामपि परिकल्पितस्वभावनास्तित्ववादिनां परतन्त्रपरिनिष्पन्नस्वभावास्तित्ववादिनामपि निर्वाणस्वरूपमनुपपत्तिपराहतम्। वैभाषिकास्तावन्निर्वाणं भावत्वेन प्रतिपद्यन्ते। तन्मते क्लेशकर्मादीनां नियतरोधभूतो जलप्रवाहरोधभूतसेतुस्थानीयो निरोधात्मकः पदार्थो निर्वाणम्। स च भावभूतोऽसंस्कृतो नित्यमवस्थानात्। यत्तु प्रद्योतस्येव निर्वाणमिति तृष्णाक्षयरूपं निर्वाणं प्रतिपाद्यते, तदपि भ्रान्त्यैवाभावत्वेन व्याचक्षतेऽतात्पर्यज्ञाः। नहि तृष्णायाः क्षय एव निर्वाणं किन्तु तृष्णायाः क्षयोऽस्मिन्निति। प्रदीपश्च दृष्टान्तमात्रम्। नहि दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्यं सम्भवति, सर्वथा साम्ये तत्त्वानुपपत्तेः।

एवं भावरूपे निर्वाणे प्रतिज्ञाते प्रत्युच्यते माध्यमिकेन। भावस्तावन्न निर्वाणं तस्य जरामरणलक्षणाविनाभावित्वात्। नहि कश्चिद्भावो जरामरणविरहितः संभवति। नह्यसंस्कृतः कश्चिद्भाव उपपद्यते जरामरणाव्यभिचारित्वात्। उक्तञ्च—"नासंस्कृतो हि विद्यते भावः क्वचन कश्चन" (मू० म० २५।५) इति। किञ्च यदि निर्वाणं भावः स्याद्धेतुप्रत्ययमाश्रित्यैवोत्पद्येत। तथा च जरामरणप्रसङ्गस्तदवस्थः। अभावस्तर्हि निर्वाणं भवतु, भावप्रतिषेधेऽभावस्य पारिशेष्यात् सिद्धिः। एतदपि अतत्त्वज्ञस्यैव कुचोद्यमभावस्य भावान्यथात्वप्रतिपादनात्। असति भावेऽभावस्याप्यसिद्धिः। यदि अनित्यतालक्षणोऽभावः स तर्हि भावमनपेक्ष्य नात्मानमासादयेत्। यदि भावस्यैव प्रागभावप्रध्वंसाभावलक्षणोऽभावः स्यात्तर्हि शशशृङ्गादीनामभावः कथं सेत्स्यति। नहि तेषामभूत्वा भावो भूत्वा वाऽभावः कल्पयितुं शक्यः। तस्मादत्यन्ताभावलक्षणोऽप्यभावो वैशेषिकैरुररीक्रियते। अत्र माध्यमिकस्यैतत्प्रतिवचनम्। यद्यपि—

> आकाशं शशशृङ्गं च वन्ध्यायाः पुत्र एव च।
> असन्तश्चाभिलप्यन्ते तथा भावेषु कल्पना॥
>
> (म० वृ० पृ० ५२८)

इति माध्यमिकेनैवाभावस्य दृष्टान्तविधयोपादानं कृतम्। असत्प्रतियोगिकश्चाभावोऽसत्ख्यातौ कृतनिर्भराणां शून्यवादिनां नानुपपन्नस्तथाप्येतेषामभावत्वं नाङ्गीकरोति वृत्तिकारः। तन्मते भावकल्पनाप्रतिषेधमात्रं शशशृङ्गादिदृष्टान्तेन

विधित्सितमाचार्येण। वन्ध्यापुत्र इति त्वर्थहीनं शब्दमात्रं चन्द्रकीर्तिर्मन्यते। तथा च निर्वाणं नेदृशमभावरूपं सम्भवति।

अथ यदि निर्वाणमभावात्मकं भावात्मकं वा न समस्ति, तर्हि कथं तस्य स्वरूपज्ञानम्। नह्यज्ञात्वा स्वरूपं निर्वाणमीदृशमनीदृशं वा समाख्यातुं शक्यम्। अपरस्य ज्ञानस्याभावे कल्पनानिर्मितमेतन्निर्वाणं प्रसज्येत। न वा शास्त्रप्रामाण्यात्त-त्सिद्धिः, शास्त्रस्याप्यपरोक्षप्रमामूलकत्वात्प्रामाण्यस्य। न च निर्वाणे प्रतिपत्ता कश्चिदस्तीति भवानभ्युपगच्छति। कथं तर्हि केनैतदित्थम्भूतं निर्वाणमस्तीति परिच्छिद्यते। यदि योगी योगजप्रत्यक्षेण परिच्छिन्द्यात्तस्य परिच्छेदस्य सत्त्वम-कामेनाऽप्यङ्गीकर्त्तव्यम्। अस्मिन्नेवंविधे प्रश्ने जाग्रति माध्यमिकः केवलं प्रतिवन्द्या समाधानमिच्छति। न खलु विज्ञानेन सविकल्पेन निर्वाणस्वरूपपरिच्छेदः सम्भवति, तस्य सप्रकारकत्वात्। निर्धर्मकञ्च निर्वाणं धर्मिग्राहकमानसिद्धम्। धर्मिग्राहकञ्च मानं यदि निर्विकल्पकं तस्य खलु शून्यतालम्बनस्य निःस्वभावत्वमास्थेयम्, अन्यथा संस्कृतत्वप्रसङ्गात् तदपि जरामरणविनिर्मुक्तं न भवेत्। तेन च जरामरणविनिर्मुक्तस्य निर्वाणस्यैवं परिच्छेदाभावे न तत्रेमा अस्तित्वनास्तित्वादिकल्पनाः सावकाशा भवेयुः। तदनुभवितापि तथागतस्तथैव अस्तित्वनास्तित्वकल्पनया न कदर्थनीयः। सर्वविकल्पातीतमेतन्निर्वाणं यत्र सर्वस्योपलम्भस्य प्रपञ्चस्योपशमः सम्पद्यते। स च ज्ञेयस्यानुपलब्ध्या प्रपञ्चोपशमो ज्ञानस्यानुपलब्ध्या च शिवः। यथा च संसारः शून्य-स्वरूप एवं निर्वाणमप्यनुत्पादात्मकं शून्यस्वरूपं विज्ञातव्यम्। उक्तञ्च भगवता—

अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम्।
आकाशेन कृतो ग्रन्थिराकाशेनैव मोचितः॥ इति।

(म० वृ० पृ० ५४०)

प्रज्ञाकरमतिना बोधिचर्यावतारपञ्जिकायां नवमे परिच्छेदे शून्यतातत्त्वं विस्तरेण विचार्य निर्वाणं शून्यस्वभावं तद्ग्राहकञ्च विज्ञानमपि भावाभावकोटि-चतुष्कनिर्मुक्तमनुत्पादात्मकं निर्वाणमवगाह्य आलम्बनाभावान्निरिन्धनवह्निवत् स्वयमेवोपशाम्यतीति प्रतिपादितम्। शून्यतायामपि नाभिनिवेशः कर्तव्योऽन्यथाऽभि-निवेशस्याप्रहाणादनिर्मोक्षो दुष्परिहारः प्रसज्येत।

शून्यतायाश्च भावस्वभावशून्यत्वं स्वकण्ठेनैव पुनः पुनरावेदितं सदपि कथमस्य

भावात्मकत्वं साम्प्रतिकैर्व्याख्यातृभिः कल्पितमिति न बोद्धुं शक्नुमः। यदि कश्चित् संशयलेशस्तथाप्यनुवर्तेत तदा तस्य निरसनं चन्द्रकीर्तिवचोभिरेव शक्यसम्पादनमित्याविष्कुर्महे। नास्तिकाविशिष्टा माध्यमिका ये खलु कुशलाकुशलं कर्म इहलोकं परलोकं च भावस्वभावशून्यमिति प्रतियन्ति। नास्तिका अपि लोकायतिका एतदेव मतं स्वसिद्धान्तमुद्घोषयन्ति। अतस्तन्मतान्माध्यमिकमतस्य कुतो विशेष.। एवं प्रत्यवस्थाने चन्द्रकीर्तिर्माध्यमिकदर्शनस्य विशेषं प्रतिपादयन्नाह—माध्यमिकाः खलु हेतुप्रत्ययसमुत्पन्नत्वात् परलोकादिकमपह्नवते। चार्वाकास्तु केवलमाहोपुरुषिकयाऽदृष्टिमात्रेण परलोकादिकमपलपन्ति। न च तेषां काचिद्युक्तिसम्पदिति महान् विशेषः। वस्तुस्वरूपेण नास्तित्वं यद्युभयोरपि तुल्यवत्प्रतिपन्नं तथापि प्रतिपत्तृभेदादनयोर्भेदः स्थवीयान्नोपेक्षणीयः। तथा हि यदि वस्तुतः कृतचौर्यं पुरुषमपरिज्ञायैव कश्चनामित्रभावाच्चौर्यमनेन कृतमित्यभ्याचक्षीत। अपरश्च दृष्ट्वैव कृतचौर्यं चौरं राजपुरुषेभ्यो निवेदयेत्तदाऽनयोर्वस्तुसत्त्वमाश्रित्य साम्येऽप्येकस्तत्र मृषाभाषी, अपरस्तु यथाभूतार्थवादीति तयोर्भेदः, एवं नास्तिकमाध्यमिकयोर्महान् भेदः (म० वृ० पृ० ३६८-९)। निश्चयचमेतद्यत् शून्यवादी सर्वेषामेव भावानां प्रतीतिसिद्धानां परमार्थतो निःस्वरूपे सत्त्वाभावे पर्यवसानं सिद्धान्तयति। ज्ञातुर्ज्ञेयस्य ज्ञानस्य वा न सद्भावमुपैति।

सर्वाभाववादी माध्यमिको न कञ्चन नित्यं भावमङ्गीकरोति, भावश्च न नित्य इत्यत्र न कामपि युक्तिं पुरस्करोति। अर्थक्रियाकारित्वमेव सत्त्वमिति क्षणिकवादिसिद्धान्तमवलम्ब्य तस्य नित्यतापह्नवो न माध्यमिकस्य सुलभः। कार्यकारणभावानङ्गीकारेऽर्थक्रियाकारित्वस्यासम्भवान्न क्षणिकत्वसिद्धान्तः प्रतितिष्ठति। यदि त्वात्मनो ज्ञानेच्छादिधर्मानुपातिनः सम्बन्धानुपपत्त्या विरोधमवलम्ब्य तदस्तित्वमपह्नुवीत तदपि न प्रेक्षावतां चेतसि चमत्कारमाविर्भावयति। तार्किकैः समवायसम्बन्धाङ्गीकारेण तस्य यत्समाधानं कृतं यदि तस्मै तन्न रोचेत, भेदाभेदवादिनां मीमांसकानामार्हतानाञ्च सिद्धान्तोऽनुपादेयः स्यात्, तथाप्याध्यासिकसम्बन्धमुररीकृत्य सांख्यानां वेदान्तिनाञ्च ज्ञानज्ञेयव्यवहारः कथं प्रत्याख्येयः। नह्यर्थक्रियाकारित्वमेव सत्त्वमिति सिद्धान्तः प्रमाणसिद्धः। भ्रमरूपाऽर्थक्रिया न वस्तुतत्त्वं साधयितुमलम्। भ्रान्त्यापि रज्जुसर्पे ज्ञाते तस्य बाधेऽपि भीतिकम्पादयोऽनुवर्तमाना नापह्नोतुं शक्याः। किञ्चार्थक्रिया-

कारित्वमपि यद्यर्थक्रियाकारित्वान्तरेण सिद्धं तदानवस्था कथं परिहर्तव्या। अथ प्रतीतिसिद्धं वस्तूनामन्यथान्यथात्वमवलम्ब्यानित्यत्वं भावानामवसीयते तर्हि प्रतीतेः प्रामाण्यमशक्यापह्नवं भवेत्, प्रतीतिश्च यथाऽस्थिरत्वं भावानामवगाहते एवं स्थिरत्वमपि। अत उभयोरुपपत्तिः सम्पादनीया, न तु सर्वथा परित्यागो हृदयावर्जकः। अर्थक्रियाकारित्वं यदि न सत्त्वप्रमापकं किं तर्हि सत्ताया लक्षणम्। अबाधितप्रतीतिविषयत्वमेवेति गृह्यतामायुष्मता।

किञ्च, हेतुसाध्यपक्षव्याप्त्याद्यनङ्गीकारे कथं विचारः सम्भवेत्। यदि परमतसिद्धं प्रमाणप्रमेयभावमभ्युपगम्य परविचारे स्वविरोधादिदूषणाभिधानमेव माध्यमिकेन क्रियेत तर्हि तदीयेऽपि विचारे हेत्वाभासानां प्रदर्शनेन तस्य भ्रान्तत्वं सिध्येदित्यवश्यमङ्गीकर्तव्यं माध्यमिकेन। यदि स्वपक्षाभावान्न तस्य बाधकेन किमप्यनिष्टमाचरणीयमित्यध्यवसायस्तदा तेन सार्धं विचारो निरर्थकः स्यात्। तथा चाहुः—

यदि काचन प्रतिज्ञा स्यान्मे तत एव मे भवेद्दोषः।
नास्ति च मम प्रतिज्ञा तस्मान्नैवास्ति मे दोषः॥ इति।

(विग्रह० २६)

यथा यथा वा तन्मतनिराकरणं क्रियतां तथा तथा स्वपक्षाभावव्याजेन तन्निराकरणमसौ निष्फलीकुर्यात्। अत एव भगवता शङ्कराचार्येण वेदान्तभाष्ये तर्कपादे सौत्रान्तिकविज्ञानवादयोर्विचारमनुष्ठाय माध्यमिकवादे न प्रयत्न आस्थितः। उपेक्षैव कृता तेन तन्मतविचारस्य कैमर्थक्यं निश्चित्य—"शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते" इति ब्रुवता।

उदयनाचार्येण स्वकृतात्मतत्त्वविवेके शून्यवादसिद्धान्त एवं निराक्रियते—शून्यतैव परमं निर्वाणमिति यदि पक्षस्तदा सा सिद्धाऽसिद्धा वा। यद्यसिद्धा वाङ्मात्रमेव पर्यवस्येत्। यदि (साक्षिप्रत्ययरूपात्) परतः सिद्धा परोऽप्यभ्युपगन्तव्यो ग्राह्यलक्षणत्वं च शून्यताया अवर्जनीयमिति। यदि परः संवृतिरेव तर्हि शून्यतापि सांवृती स्यात्। अथासंवृतिरूपः परस्तस्यापि परतः सिद्धानवस्था। स्वयमसिद्धश्चेत् कथं शून्यत्वमपि साधयेत्। स्वतः सिद्धश्चेत्तर्हि आयातोऽसि मार्गेण (स्वप्रकाशत्वस्य) औपनिषदपक्षस्याङ्गीकारात्। स एव हि वेदान्तिनः सिद्धान्तः। स्वतः सिद्धतया तन्निर्वाणमनुभवरूपम्। तथा हि—"स्वतः सिद्धतया तदनुभवरूपम्।

शून्यत्वादेव च न तस्य कालावच्छेद इति नित्यम्। अत एव च न देशावच्छेद इति व्यापकम्। अत एव तन्निर्धर्मकमिति विचारास्पृष्टम्, तस्य धर्मधर्मिभावमुपादाय प्रवृत्तेः। अत एव विशेषाभाव इत्यद्वैतम्, प्रपञ्चस्यापारमार्थिकत्वाच्च। निष्प्रति-योगिकमिति विधिरूपम्, अविचारितप्रपञ्चापेक्षया तु शून्यमिति व्यवहारः।" (आत्मतत्त्वविवेके, पृ० ५३४ ए० सो० सं०)। उदयनस्तु न्यायमतावलम्बेन बौद्धमतनिराकरणे प्रयत्नमातिष्ठते। अतः खलु यद्यपि तस्यौपनिषदे सिद्धान्ते बलवती आस्था, तथापि—"तदास्तां तावत्, किमार्द्रकवणिजो वहित्रचिन्तया" इति ब्रुवाणोऽयं नैयायिकपक्षमालम्ब्य बौद्धमतनिराकरणे प्रायतिष्ट। पुनश्च ज्ञानमपि सांवृतं निर्वाणं गोचरयतीति सिद्धान्तं "यथा यथा च बुद्धिनिवारणाय यत्नस्तथा तथोज्वलः प्रकाशः। तन्निवारणमपि बोद्धव्यमेवेति" (आ० त० वि० पृ० ६३३) इति शून्यवादखण्डन-मुपसंजहारोदयनाचार्यः। यथा चात्मास्तित्वाङ्गीकारेऽपि न रागद्वेषादयः प्रसरं लभेरन् तथा विज्ञानवादविचारावसरे प्रदर्शयिष्याम इति शम्॥

विज्ञानवादविमर्शः

माहायानिकागमेषु विज्ञानवादस्य विप्रकीर्णतया प्रतिपादनं प्रतीतिगोचरीभवति। परन्तु लङ्कावतारादिसूत्रेषु विज्ञानवादे वा परमं तात्पर्यं शून्यवादे वा तत्र तत्र समुपन्यस्यमानानां बुद्धवचनानामिति महान् विशयस्तत्तद्ग्रन्थाध्येतॄणां चेतसि समुन्मिषति। संकीर्णतयैव प्रमाणभूतेषु महायानिकेष्वागमेषु शून्यवादविज्ञानवादयोः प्ररूपणमुपलभ्यते। यथा खलु उपनिषद्वाक्यानामद्वैतिभिरद्वैतपरतया व्याख्यानं क्रियमाणं दृश्यते, विशिष्टाद्वैतादिभिश्च तेषामेव वाक्यानामन्यथाऽन्यथा स्वसिद्धान्तानुकूलतया विवरणं क्रियमाणं दरीदृश्यते, एवं बौद्धागमवाक्यानामपर्यायमेव दशा समजनि। तत्र ये खल्वापातविरोधिनः सूत्रान्तास्ते नेयार्थाः, ये पुनः स्वसिद्धान्तानुकूलास्ते नीतार्था इति भेदव्यवस्थापनेन आगमानां व्याख्यानं न अन्यतरमतस्य स्वारसिकतया आनुकूल्यं प्रातिकूल्यं वा समाचरेत्। केवलमागमैकशरणानाम् असंकीर्णसिद्धान्तप्रतिष्ठापने सामर्थ्यं न प्रादुःष्यादिति त्वस्माकं दृढतरः सम्प्रत्ययः। समन्वयस्तु बुद्धिकौशलेन व्याख्यातॄणां न अशक्यानुष्ठानः। तथा च—"व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखी" (नैष० १७।५०) इति श्रीहर्षस्य वचनमाभाणकवत् प्रचरद्रूपं गरीयसो मतभेदस्य रहस्यमुन्मीलयति।

विज्ञानवादस्य प्रस्थानद्वयं स्थूलदृष्ट्यास्माकमुपलब्धिगोचरो भवति। प्राचीनं प्रस्थानं मैत्रेयासङ्गोपज्ञं वसुबन्धुना समुपबृंहितं शास्त्रोचितशैल्या प्रतिपाद्यमानं प्रमीयतेऽस्माभिः। दूयामहे यत्खलु अश्वघोषप्रणीतं श्रद्धोत्पादसूत्रमधुना विलुप्तम्। केवलं चैनिकभाषायां तस्यच्छाया दृश्यते। स च चैनिकभाषानुवाद आङ्ग्लभाषयाऽनूदितः श्रीमता सुगृहीतनामधेयेन जापानदेशीयपण्डितवरेण सुज़ुकिमहोदयेन। महायानसूत्रालङ्कारः सव्याख्यः; विज्ञप्तिमात्रतासिद्धिर्वसुबन्धुकृता व्याख्योपेता, मध्यान्तविभागस्य च टीका प्राचीनयोगाचारमताववबोधे प्रमाणीभवन्ति। ह्वेनचाङ्नामा सुप्रथितचैनिकपण्डितः स्वभाषया वसुबन्धुकृतविज्ञप्तिमात्रतासिद्धेर्भाष्यं समाकलयाञ्चक्रे। तस्य खलु फ्रेंचभाषया विवरणात्मानुवादः पुष्यनाम्ना पण्डितप्रका-

खण्डेन प्रणीय प्राकाश्यं नीतः। तथापि मूलभूतसंस्कृतवाङ्मयस्य विरहे तेभ्यो ग्रन्थेभ्यः संशयविपर्यासानास्कन्दिता व्युत्पत्तिर्नातिसुलभा भवति। वसुबन्धुकृता विज्ञप्तिमात्रतासिद्धिरपि पुष्कलव्याख्यारहिता न निस्संशयितां प्रतिपत्तिमादधाति। तथापि यावदुपलभ्यते तावतैव सन्तोष्टव्यमस्माभिः। तत्रापि ये खलु प्रमेया न संशयपदवीमतिवर्तन्ते तेषां महायानसूत्रालङ्कारमध्यान्तविभागटीकादिभिश्च संवादनेन तदेकवाक्यतानुरोधेन च समुपपादनं विधेयं विद्वद्भिः। अर्वाचीनं प्रस्थानं दिङ्नागोपज्ञं धर्मकीर्तिना कृतोपबृंहणमाकरग्रन्थाभावाच्च चेतसि चमत्कारमाविष्करोति। दिङ्नागप्रणीतः प्रमाणसमुच्चयो नोपलभ्यते। तदुपपादकं प्रमाणवार्तिकं धर्मकीर्तिविरचितमस्मत्सौभाग्योदयेन प्राकाश्यं नीतं महापण्डितेन राहुलसांकृत्यायनेन। परन्तु ग्रन्थवरोऽयं पुष्कलव्याख्यानमुपबृंहितो नोपलभ्यते। मनोरथनन्दिकृता टीका अतीव संक्षिप्ता न परितर्पयति चित्तम्। कर्णगोमिकृतञ्च व्याख्यानं खण्डश उपलभ्यते। यावत्पर्यन्तं प्रमाणसमुच्चयस्य व्याख्योपव्याख्यासहितस्य प्रादुष्करणं न भविता तावदस्माकं तन्मतपरिज्ञानमर्धजरतीयन्यायविषयतां नातिपतिष्यति। अतः खलु पुष्कलप्रामाणिकग्रन्थापरिचयाद् बुद्धिमान्द्याच्च प्रस्तूयमाने विज्ञानवादव्याख्याने बहुधो न्यूनता अनुपपत्तयश्च अप्रतिपत्तयश्चोत्तानीभविष्यन्ति। अशक्तिकृतं स्खलनजातं क्षमावद्भिर्विद्वद्भिर्मर्षणीयमिति प्रार्थयामहे।

विज्ञानवादे सर्वप्रस्थानैर्निर्विशेषेण बाह्यार्थस्यासंभवं सिद्धवत्कृत्य विज्ञानमेव परमार्थसत् तत्त्वं वासनावशाद्विविधबाह्यपदार्थाकारेण प्रतिभासत इति निर्विवादः सिद्धान्तः। विज्ञानमेकमनेकं वा क्षणिकमक्षणिकं वेति विषये प्राचीननवीनप्रस्थानयोर्यद्यप्यप्रतिसमाधेयो विरोधस्तथापि बाह्यार्थापह्नवे सर्वेषां विज्ञानवादिनामेकवाक्यतैव। वसुबन्धुना विंशतिकायां विज्ञप्तिमात्रमेव तत्त्वं बाह्यवस्तूनाञ्च प्रतिभासमानानामसत्त्वं बाह्यवस्त्वभावेऽपि स्वप्नादिवद्देशकालादिनियमः सन्तानानियमश्च शक्योपपादन इति प्रदर्शितम्। यदि बाह्यं वस्तु नास्ति तत्प्रतिभासञ्च विज्ञानं भ्रान्तं स्यात् तर्हि कथं सर्वेषामेव प्राणभृतां तद्दर्शनमविशेषेणोपपद्यत इत्यारेकायां देशकालनियमः स्वप्नदृष्टान्तेन व्याख्यायते। यद्यपि शुक्तिरजतादिप्रत्ययः कस्यचिदेव प्रातिस्विक उपजायते, तथापि नारकाणामिव बहूनामेकाकारभ्रमो नासम्भवी। तथा हि नरकपालादीनां दर्शनं नारकाणां तुल्यकर्मविपाकानां भ्रान्त्यैव अहमहमिकया सञ्जायते।

न च नरकपालादीनां वस्तुसतां तत्र सम्भवः, यावता तेषां नरकादिदुःखभोगाभावान्नारकाणां जीवानामिव दुष्कर्मपरिणामादेव तत्र समुत्पादो न कल्पयितुं शक्यः। तस्माद्देशकालादिनियमेन बहूनां सन्तानानामनियमेन एकाकारप्रत्ययानुरोधेन बाह्यार्थसद्भावो नानुमातुं शक्येत, सन्दिग्धविपक्षव्यावृत्तिकत्वाद्धेतूनाम्। बाह्यार्थासद्भावेऽपि सन्तानानियमादिहेतूनां सद्भावदर्शनेन अनैकान्तिकत्वं स्पष्टमेव। एवं तर्हि बाह्यार्थसद्भावो भवतु सन्दिग्धः, कथं तस्य सिद्धवत्कारेण प्रतिषेधो विज्ञानवादिनां संगच्छेत। यावद् बाह्यार्थासद्भावप्रमापकं बलवत्तरं प्रमाणं नोपस्थाप्यते न तावद्विज्ञप्तिमात्रतासिद्धान्तः सुदृढभूमिकायां प्रतिष्ठितो भवेत्।

ईदृशीमाशङ्कामुत्प्रेक्ष्य वसुबन्धुर्बाह्यार्थो नोपपद्यत इति सिद्धान्तं बाह्यार्थस्य स्वरूपपरीक्षणेनैव निश्चाययति। घटपटादयश्च बाह्यार्था भासमाना एकरूपा वाऽनेकरूपा वा भासेरन्। परमाणव एव घटपटादीनामुपादानकारणतयाभ्युपेयन्ते वैशेषिकैः। तत्र परमाणुद्वितयं संयुक्तं सद् द्व्यणुकं भवति, त्रिभिश्च द्व्यणुकैरेकस्त्रसरेणुरुत्पद्यते। द्व्यणुकपरिमाणस्याणुपरिमाणादभिन्नत्वात् संख्याबहुत्वेन स्थूलत्वसंभव इति कृत्वा द्व्यणुकत्रितयारब्धस्त्रसरेणुरेव आद्योऽवयवी समुपेयते। त्रसरेणूनाञ्च परस्परं संयोगे स्थौल्यतारतम्यमुपपन्नं भवतीत्यवयवातिरिक्तावयविकल्पनया वस्तूनां परिमाणतारतम्यमुपपादयन्ति वैशेषिकाः। वैभाषिकैस्त्ववयवेभ्यः पृथग्भूतोऽवयवी नाङ्गीक्रियते। एवं सौत्रान्तिकानामप्यवयविद्रव्यं स्वावयवेभ्यः परमाण्वादिभ्यो व्यतिरिक्तं प्रमाणेनानुपपन्नं कार्त्स्न्यैकदेशविकल्पप्रतिहतत्वात्। नह्येकस्मिन्नवयवेऽवयविनः कार्त्स्न्येन सम्भवः, अवयवान्तरेष्वसद्भावप्रसङ्गात्। न वा अंशेन, अवयविनोऽखण्डस्यैकरूपस्य अंशायोगात्, तदभ्युपगमेऽवयवानन्त्यप्रसङ्गाच्च। न वा व्यासज्यवृत्तिरवयवी, तस्यैकत्वेनानेकेषु वृत्तिरंशभेदकल्पनामन्तरेण न प्रतीतिपथमवतरति। किञ्च, परमाणुरेव यदि वस्तुसन् सम्भवेत् तदैवैतासां कल्पनानामवकाशः। न च परमाणुरेको निरंशः सिद्धिविषयतामानिह्नते। परमाणुभ्यः स्थूलप्रचयोत्पत्तिः परस्परसंयोगादेव सम्भवेत्। स च संयोगः षड्भ्यो दिग्भेदेभ्यः समुपनतानां परमाणूनां मध्यवर्तिना परमाणुना तदैव सम्भवेत्, यदि परमाणोः षड्भागाः सम्भवेयुः। अन्यथा यदि षण्णामेकदेश एव संयोगः स्यात्तदा परमाणुपरिमाणानाम-

नतिक्रमात् स्थूलोत्पत्तिरसम्भविनी । यदि भिन्नेष्वेवैकपरमाणुप्रदेशेषु षण्णां संयोगोऽभ्युपगम्यते तदा परमाणुः सावयवः प्रसज्येत ।

भदन्तशुभगुप्तस्तु परमाणवः समुदिता उत्पद्यन्ते विनश्यन्ति च, अतस्तेषामेकज्ञानप्रतीतिः स्थूलतया । अविच्छिन्नसजातीयपरमाणुसङ्घाते स्थूलविभ्रमो जायते । स च मानसः । एतच्च शान्तरक्षितकमलशीलौ युक्त्यपेतं मन्येते । नहीयं भ्रान्तिर्मानसी स्पष्टतया प्रतिभासनात् । मानसी च प्रतीतिर्विकल्परूपा अवस्तुजन्या न स्पष्टतां बिभृयात् । न च देशवितानेन प्रतिभासमानाः परमाणवः स्वं स्वभावं जहति । तथा च अणुभ्यः स्थूलतोत्पत्तिः प्रमाणविरुद्धा कथं कल्पयितुं शक्येत । एकैकशः परमाणूनां न प्रतिभासः, अयोग्यत्वात्, नापि संहतानां सङ्घाताभावात् । तथा हि परमाणूनां संयुक्तत्वं नैरन्तर्यं सान्तरैः परिवारणं वा प्रचयोत्पत्तेर्निदानं कल्पनीयम् । न च दिग्भागभेदकल्पनामन्तरेण एकस्यापि कल्पस्य सम्भवः । अत एव प्रतिभासमानस्य स्थूलरूपस्यैकत्वमनेकत्वं चासिध्यत् तस्य मिथ्यात्वमेव परिशेषयति । अथ कथमसति प्राक्तने यथार्थे स्थूलप्रत्यये तत्संस्काराभावात्तद्विषयभ्रान्तिः सम्भवेदिति चेन्मिथ्याशास्त्रश्रवणादिजनितवासनापरिपाकाद् वातायनादिरेणुनिर्भासा बुद्धिरेव परमाणुकल्पनाया निबन्धनम् । स्थूलत्वभ्रान्तिश्च अनादिमिथ्यानुभवजनितवासनासमुद्भूतामयथार्थप्रतीतिं प्राक्तनीं कारणत्वेनानुभाषयितुं समर्था । भ्रान्तिकारणं संस्कारः पूर्वां प्रतीतिं कारणत्वेनापेक्षते, न प्रमितिम् । एतेनैव विचारेण सिद्धमेतद्यत्प्रतीयमानं वस्तु एकं न वा अनेकं किन्तु स्वप्नाद्यनुभूतवस्तुवन्मिथ्याभूतं प्रतीयत इति ।

वसुबन्धुनोपस्थापितप्रमाणमुररीकृत्य धर्मकीर्तिनोक्तम्–"भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः । यस्मादेकमनेकञ्च रूपं तेषां न विद्यते ।।" (प्र० वा० अस० चि० २२७-३६०) इति । ननु स्थूलदृष्टिर्भ्रान्तिश्चेत्, सा च विद्यमानाविद्यमानयोः सादृश्यदर्शनोद्बुद्धसंस्कारजनिता अरजतात्मन्यपि शुक्तिकायां सादृश्यदर्शनाज्जायते । अत्र च कस्यचित्स्थूलस्य वस्तुनो याथातथ्येनादर्शनात् कथं तत्साधर्म्यावष्टम्भेन भ्रान्तिर्जायतामिति चेदुच्यते, सन्ति काश्चित्साधर्म्यदर्शनादभ्रान्तयः । या त्वविद्यासमुद्भूता सा वितथप्रतिभासिनी भ्रान्तिः साधर्म्यमनपेक्ष्यैव तैमिरादिप्रतीतिरिव प्रतिभासते । दोषोद्भूता चेयं स्थूलत्वप्रतीतिरनपेक्षितसाधर्म्यदर्शना प्रवर्तत इति किं नामानुपपन्नम् (प्र० वा० ३६१-६३) । धर्मकीर्तिना पुनर्ज्ञानस्वरूपनिरूपणेन दृग्दृश्यसम्बन्धमसम्भव-

पराहतं प्रदर्शयता बाह्यार्थे प्रमाणाभाव आपाद्यते। तथा हि ज्ञानमनाकारं साकारमन्याकारं वा भवद् बाह्यमर्थं प्रवेदयेत्। यदि ज्ञानं घटपटादिविषयभेदेऽप्यनाकारमेकरूपं स्यात्तर्हि इदं घटस्य ज्ञानं न पटस्येति प्रतिकर्मव्यवस्था नोपपद्येत। साकारमपि ज्ञानं विषयं गृह्णातीत्यपि कल्पना न श्रेयसी, यावता विषयस्य ज्ञाने स्वाकारसमर्पकत्वे न प्रत्यक्षं प्रमाणम्। नहि विषयाकारस्य ज्ञानाकारस्य च युगपत् संवेदनमानुभविकं तथात्वे वा विषयस्य स्वरूपतो दर्शनसम्भवे ज्ञानाकारकल्पना निष्प्रयोजना भवेत्, ज्ञानाकारस्य विषयदर्शनाभ्युपायत्वात्। अतो निराकारमिव साकारमपि ज्ञानं न बाह्यसद्भावे प्रमाणं भवितुं क्षमते। अन्याकारञ्च ज्ञानमन्यञ्च विषयं गृह्णातीति तु स्ववचनपराहतमेव। नहि रजताकारं ज्ञानं शुक्तिकायां प्रमाणमिति केनापि स्वस्थचेतसा अङ्गीक्रियते।

विज्ञानस्य स्वप्रकाशत्वम्

नन्वेवं सति विज्ञानमप्यसिद्धं भवेद् ग्राहकाभावादिति चेत्? न, विज्ञानस्य ग्राहकानपेक्षत्वाद्विज्ञानं स्वयं प्रकाशमानं न कारणान्तरमपेक्षते। तथा चोक्तम्—"विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते। इयमेवात्मसंवित्तिरस्य याऽजडरूपता॥" (त० सं० प० ५५६-२०००) इति। न च स्वप्रकाशत्वरूपे स्वसंवेदनेऽभ्युपगम्यमाने कर्तृकर्मविरोधः स्यात्, एकस्यैव ज्ञानस्य ग्राहकत्वे ग्राह्यत्वे च तदेव कर्तृरूपं तदेव च कर्मरूपं प्रसज्येत। न च कर्ता स्वक्रियायाः कर्म भवितुमर्हः, कर्मणः कर्तृजन्यक्रियाफलाश्रयत्वादिति वाच्यम्, "स्वरूपवेदना यान्यद् वेदकं न व्यपेक्षते। न चाविदितमस्तीदमित्यर्थोऽयं स्वसंविदः॥" (त० सं० पं० ५६२—२०१२) इति न कर्तृकर्मविरोधप्रसङ्गः। ज्ञानस्य स्वप्रकाशत्वं चित्सुखाचार्येण बलवतीभिर्युक्तिभिः प्रतिपादितम्। नैयायिकानां तथा माध्यमिकानां वैभाषिकाणाञ्च ज्ञानस्य स्वसंवेदनात्मकत्वेऽतिमहती विप्रतिपत्तिर्दृश्यते। ज्ञानस्य स्वप्रकाशत्वे विषयज्ञानयोर्नियमेन युगपत्प्रतीतिरङ्गीकर्त्तव्या। तथा च—"सहोपलम्भनियमादभेदो नीलतद्धियोः" इति धर्मकीर्तिमतमप्रतिहतं स्यात्। अत एव नैयायिकेन ज्ञानं निलीनमेव चक्षुरादिवद् विषयं प्रकाशयतीति पक्षः ससंरम्भं प्रतिपाद्यते। भट्टमीमांसकस्तु ज्ञानमप्रत्यक्षमेव केवलं ज्ञाततालिङ्गेनानुमानेन सिद्धं भवति, अतो विषयप्रकाशनकाले तस्य प्रतीतिर्दूरापेतेति प्रतिजानीते। अस्यां विप्रतिपत्तौ जयन्तभट्टवचनं स्मरणमुपयाति। ज्ञानेनैव

विषयसिद्धिस्तत्र ज्ञानस्वरूप एव विप्रतिपत्तौ—"प्रत्यक्षविषयेऽप्येताश्चित्रं विप्रतिपत्तयः। परोक्षार्थे हि विमतिः प्रत्यक्षेणोपशाम्यति॥ इदं भाति न भातीति संविद्विप्रतिपत्तिषु। परप्रत्यायने पुंसां शरणं शपथोक्तयः॥" (न्या० मं० ८१ पृ०) इति ज्ञानस्य स्वप्रकाशत्वसाधिका युक्तिः स्वानुभवमनपलप्य न निराकर्तुं शक्यते। अतिविस्तरेण न्यायादिनिबन्धेषु स्वप्रकाशत्वखण्डनमुपलभ्यते। नहि तस्य बहुधा चर्चितस्य पुनश्चर्चा विदुषां चेतसि चमत्कारमुत्पादयेत्। प्रत्युतातिविदितस्य प्रज्ञापनं वैरस्यायोपकल्पेत। संक्षेपेण तावदेतदुच्येत—यदि ज्ञानमप्रकाशं सद् विषयं प्रकाशयेदिति मतिस्तदा जडरूपाद् विषयात् कोऽस्य भेदः। नहि चक्षुरादिदृष्टान्ताः प्रकृते आञ्जस्येनोपयुज्यन्ते। नहीन्द्रियं साक्षाद्विषयं प्रकाशयति, किन्तु ज्ञानं जनयदेव। ज्ञानं तु न विषये कमप्यतिशयं जनयद् विषयप्रकाशने व्याप्रियते। ज्ञानमुत्पन्नमज्ञातम्, तद्विषयश्च ज्ञात इति तु स्ववचनविरुद्धं प्रतिभाति। अर्थवित्तौ व्यापृतं ज्ञानं नात्मानमृच्छतीति कुमारिलोक्तिर्नैयायिकादिभिः क्रियासमभिहारेण प्रतिध्वनितापि न प्रत्याययतीव। अर्थस्य संवित्तिरेव ज्ञानं तच्च स्वात्मनि शक्त्यभावं न व्यापिपर्तीति मतं नाङ्गीकर्तुं न वा निराकर्तुं कस्यापि सामर्थ्यम्। धर्मकीर्तिना तु—"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति" इति न्यायविनिश्चय उक्तम्। प्रमाणवार्त्तिके च—"सकृत् संवेद्यमानस्य नियमेन धिया सह। विषयस्य ततोऽन्यत्वं केनाकारेण सिध्यति॥" इति ज्ञानविषययोरेकवित्तिवेद्यत्वं प्रतिपादितम्। न च ज्ञानमज्ञातमेव विषयप्रकाशकमिति मतं समीचीनं प्रतिभाति। तथात्वे विषयस्मृतिकाले ज्ञानस्य स्मृतिर्न नियमेन भवेत्। अपि च, अज्ञातं ज्ञानम् असत्कल्पं न प्रमाणसिद्धं भवेत्। नहि प्रमाणमन्तरेण वस्तुनः सिद्धिः। ज्ञानं चेदज्ञातं स्यात् तदा अप्रामाणिकं ज्ञानं जातमिति न प्रमापयितुं शक्यम्। ज्ञानमज्ञातमजातं चेति तुल्यवद् भवेत्।

किञ्च, ज्ञानमनुव्यवसायेनैव ग्राह्यम्। येनैव चात्ममनःसंयोगेन विषयो गृहीतः, स एव चेज्ज्ञानग्रहणस्य सामग्री तदा अवश्यं ज्ञानं विदितं भवेत्, अन्ततोऽनन्तरक्षणे, ज्ञानयौगपद्यानङ्गीकारपक्षे। तथा च तत्क्षणे वा तदनन्तरक्षणे वा ज्ञानमवश्यं वेद्यमित्याख्यातं भवति। तत्र च क्षणविलम्बस्य शपथमात्रनिर्णेयत्वादनुव्यवसायेन स्वोत्पत्तिक्षण एव ज्ञातं न पूर्वमिति नासंदिग्धम्, स्वसमयानुरोधेनैव तदङ्गीकारात्। यदि पुनः प्रतिबन्धकाद् विषयान्तरसञ्चाराद् वा न तस्यानुव्यवसायो

नियमेनेत्यभिमन्यते, तदाप्रामाणिके व्यवसाये कथं सत्त्वनिर्णयः। "अथ या वित्तिर्न मानान्तरवेद्या सा प्रमाणाभावादसतीति तदधीनसत्त्वस्य विषयपर्यन्तस्यासत्त्वं स्यात्। न, कासाञ्चिद् बुद्धीनां स्मरणादिना लिङ्गेन विशेषतः, कासाञ्चित्तु ज्ञानत्वेन सामान्यलक्षणाया प्रत्यासत्त्या ज्ञानात् प्रमेयमित्यादिवेदने च भानाच" (आ० वि० ६८५) इति यदुक्तं भगीरथठक्कुरेण तदपि न हृदयमावर्जयति। यदि स्मरणेन कस्यचिज्ज्ञानस्य सिद्धिस्तदा अस्मृतस्य ज्ञानस्य का गतिः? सामान्यलक्षणाया प्रत्यासत्त्या प्रमेयमिति ज्ञानेन ज्ञानमात्रस्य ज्ञानं सिध्यतीति यदुक्तं तदपि नात्यन्तं प्रत्यायकम्। यावता प्रमेयत्वादिना सामान्येन सर्वं वस्तु शृङ्गग्राहिकया ज्ञायत इति न सुवचम्; तथात्वे एकज्ञानवत्त्वेन सर्वज्ञत्वापत्तिः खण्डनोक्ता दुर्निवारा भवेत्। अर्थानुभवजन्यया अर्थस्मृत्या विषयीकृतस्यार्थस्य स्वविषयकस्मृतिमनुत्पाद्य प्रतीतिर्जायते, तेन च स्मर्यमाणेनार्थेन तद्विषयकस्मृतेरनुमानं भवतीति व्याख्यानं न प्रत्ययमाधत्ते। अर्थः स्मर्यते न तु तस्य स्मृतिरिति विवादास्पदमेव। ईदृशं क्लिष्टव्याख्यानं मीमांसकानां श्रुत्यादिवाक्येषु दृष्टचरमप्यनुभवविषये नात्यन्तं सामञ्जस्यं बिभर्ति। फलतस्तु ज्ञानस्य विषयेन सहैव ज्ञानेऽङ्गीकृते यथा वस्तुव्यवस्था सुसमञ्जसा भवति न तथा ज्ञानज्ञानापह्नवे। किञ्च, सुखमुत्पन्नं स्वानन्तरोत्पन्नेन ज्ञानेन विषयीकर्त्तव्यम्। न चानन्तरभाविना ज्ञानेनावश्यं भवितव्यमिति नियमो नैयायिकानां सुवचः, सुखवज्ज्ञानस्याप्यवश्यवेद्यत्वापातात्। किञ्च, सुखे जाते तदनन्तरोत्पत्तिकं ज्ञानं यदि केनचित्प्रतिबन्धकेन नोत्पद्येत तदा सुखमज्ञातमेवावतिष्ठेत। सुखं चाज्ञातमजागलस्तनायमानमुत्पन्नं सत् किं वा कुर्यात्। सुखदुःखानुभवार्थमेवादृष्टमङ्गीक्रियते। अज्ञातं सुखं दुःखं वा उत्पादयददृष्टं निष्फलमेव भवेत्, निष्फलञ्चादृष्टं स्ववचनविरुद्धम्। अनया च कल्पनया अदृष्टस्य धर्मिग्राहकमानसिद्धं फलाविनाभावित्वं व्याहन्यते। किञ्च, सुखमुत्पन्नं द्वितीय एव क्षणे व्यवसीयमानं तृतीये क्षणेऽनुव्यवसातव्यम्। यदि पुनः प्रतिबन्धकवशादनुव्यवसायस्यानुत्पत्तिस्तदा व्यवसितमपि सुखं ममैव सुखमिति परिज्ञानाभावात्परकीयसुखवत् न ज्ञातुरुपकुर्यात्। उत्पन्नमेव सपदि सुखं गृह्यते ज्ञानेनेति कथमनुत्पन्नान्न विशिष्यत इति चेत्? तर्हि दीयतां ज्ञानेऽपि प्रसन्ना दृष्टिः। किञ्च, ज्ञानजन्याया इच्छायाः कृतेश्च स्वरूपसत्याः फलोपधायकत्वे जडयन्त्राच्चेतनस्येच्छादिमतो न कोऽपि विशेषः प्रतीयेत। सुखं चेच्छाति

तदर्थञ्च प्रयतते न तु जानाति, अहमिच्छामि प्रयते वा इति त्वतीव क्लिष्टकल्पनम्। अपि च, चरममात्मज्ञानं मोक्षसाधनमज्ञातमेव विपर्ययादिकं विनाशयति। न च तस्यानुव्यवसायः, तत्रापि प्रसङ्गस्य तादवस्थ्यात्। ईदृशस्य सर्वथाऽज्ञातस्य तत्त्व-साक्षात्कारस्याप्रमाणसिद्धस्य कथं सत्ता साधनीया। "चरमं ज्ञानमनुद्भूतमेवोत्पद्यते" (आ० त० वि० ६८३) इति शङ्करमिश्रवचनं विस्मयमुत्पादयति। येन च ज्ञानेनोत्पद्यमानेन सर्वविपर्ययनिवृत्त्या संसारनिवृत्तिः सञ्जाघटीति, तदेव ज्ञानमनुद्भूत-मिति न श्रद्धेयं वचः।

कथं तावदेतावान् प्रयासो ज्ञानस्य परप्रकाश्यत्वस्थापने आलम्बितो नैयायिकेन। यदि सहोपलम्भनियमं परिहर्तुकामेनैतदनुष्ठितं तदा—"अहो बत इमे केभ्यो बिभ्यतः श्रोत्रियाः परं किमपि वैक्लव्यमुपागताः" इति जयन्तवचनमेव 'श्रोत्रियाः' इत्यस्य स्थाने 'तार्किकाः' इति पदं निक्षिप्य नैयायिकेभ्य उपहरामः। सहोपलम्भनियमश्च यदि भवेद् भवतु नाम। न तावता ज्ञानविषययोरभेदोऽवश्यन्तया निगमनीयः, जाति-व्यक्त्योः सहोपलम्भनियमेऽप्यभेदासिद्धेः। किञ्च, ज्ञानस्य स्वसंवेदने कर्तृकर्मविरोधो नैयायिकैर्नापादनीयः, ज्ञानस्य गुणत्वेन क्रियात्वाभावात्। वैयाकरणानामेवेयं प्रक्रिया, न च सा सर्वत्र वस्तुगतिमनुरुणद्धि। नैयायिकानामपि नहि ज्ञानत्वावच्छेदेन पर-प्रकाश्यत्वम्, ईश्वरज्ञानस्य स्वप्रकाशत्वाङ्गीकारात्, अन्यथेश्वरस्यासर्वज्ञत्वापत्तेः। न च उदयनाचार्यस्य मते स्वप्रकाशत्वाङ्गीकारे ज्ञानस्य स्वभावहानिरिति शङ्कनीयम्। "आत्मा तु किं स्वप्रकाशसुखस्वभावोऽन्यथा वेति पृच्छामः। श्राद्धोऽसि चेदुपनिषदः पृच्छ। मध्यस्थोऽसि चेत्, अनुभवं पृच्छ। नैयायिकोऽसि चेत्, न वैषयिक-सुखज्ञानस्वभाव इति निश्चिनुयाः" (आ० त० वि० ६३३) इति स्वयं ब्रुवन्नाचार्यो नात्यन्ताय स्वप्रकाशत्वपक्षमपहस्तयति।

विषयताविचारः

ननु भवतु ज्ञानं स्वप्रकाशं वा परप्रकाशं वा, तस्य खलु केनचिद्विषयेण भवि-तव्यम्। विषयस्य ग्राह्यत्वं ज्ञानस्य ग्राहकत्वमिति विषयविषयिभावलक्षणः सम्बन्धो न शक्यापह्नवः, ज्ञानस्य सविषयकत्वनियमात्। अनयोश्च सम्बन्धो विषयताख्यः। सा च विषयता किं ज्ञानविषययोः स्वरूपसम्बन्धः? तथात्वेऽतीतानागतयोर्विषयत्वा-

नुपपत्तिः, तयोरसत्त्वात्। अथ किन्निष्ठं तावद् विषयतानियामकम्। रूपं बाह्यं पारमार्थिकं ज्ञानं चानित्यमिति येषां पक्षस्तेषां नैयायिकानां मते ज्ञाननिष्ठमेव-तदङ्गीकर्त्तव्यम्। ये च साकारज्ञानवादिनस्तेषां सांख्यवेदान्तिनां मते ग्राह्यनिष्ठ-मेव नियामकम्, अन्यथा ज्ञाननिष्ठत्वे सर्वदैव घटं जानामीत्यनुव्यवसायप्रसङ्गात्। स चानिष्ठः, विषयभेदानुभवस्य स्फुटमुपलब्धेः। न्यायमते तु ज्ञाननिष्ठो विषयविषयि-भावः। स च—"प्रकाशस्य सतस्तदीयतामात्ररूपः स्वभावविशेषः" इत्युदयनाचार्यः। तदीयता च ज्ञानीयता ज्ञानसम्बन्धितेति यावत्। ज्ञानस्यैव स्वभावविशेषो विषयता। ज्ञानमुदयमानं विषयमुल्लिख्यैवोदयते, न कदापि विषयानुल्लेखि ज्ञानं सम्भवति। ईदृशश्च स्वाभाविकः सम्बन्धो न ज्ञानविषयोभयनिष्ठः, तदुभयस्वभावनिरूपित इत्यङ्गीकर्तुं शक्यम्, विषयस्यातीतानागतरूपस्याविद्यमानत्वेऽपि तदुपलब्धेः। अतो ज्ञानस्वभाव एव विषयविषयिभावः कक्षीकर्तव्यः। अथ स्वभाव इति कोऽर्थः? यदि स्वस्य भावो धर्मः स्वभावस्तदा ज्ञानस्य धर्मो घटत्वादीत्यभ्युपगम्यमाने साकारज्ञानवादे प्रवेशापत्तिः। स्व एव भाव इति निरूप्यमाणे विषयस्य ज्ञानात्मनि प्रवेशाद् ज्ञानस्वभा-वानतिरेकाद् विज्ञानवादाङ्गीकारप्रसङ्गो दुरावाधः। किञ्च, तदीयत्वं विषयसम्बन्धित्वं यदि ज्ञानस्यैव धर्मो भवेत्तर्हि घटो ज्ञानविषय इत्यभिलापो नोपपद्यते, विषयताया ज्ञान-निष्ठत्वादेव घटनिष्ठत्वाभावाच्च। अथ विषयस्यैव विषयतास्वभावः स्यात्तर्हि ज्ञान-मनपेक्ष्यैव विषयग्रहणं प्रसज्येत। न वा ज्ञानविषयोभयनिष्ठः स्वरूपसम्बन्ध एव विषयतेति मन्तव्यम्, तथात्वेऽयं पुरुषः किञ्चिज्जानाति, अयञ्च घट इति ज्ञानस्य घटस्य च ज्ञाने जाते तत्रायं घटं जानाति न वेति वस्तुतो घटज्ञानवति पुरुषे ज्ञायमाने संशयो न समुदियात्, उभयोर्ज्ञानघटयोः स्वरूपस्य ज्ञानात्। अथ तयोर्न संश्लिष्टतया ग्रहणमिति घटज्ञानस्वरूपयोर्ज्ञाने सत्यपि घटज्ञानवानयमिति धीर्नोदेतीत्युच्येत, तदा विषयताख्यः सम्बन्धो न गृहीतः सत्यपि सम्बन्धस्वरूपग्रहणे इत्युक्तं भवेद् भङ्ग्यन्तरेण। अतो विषयताख्यं धर्मान्तरमङ्गीकर्त्तव्यम्। अयमेव च रघुनाथशिरोमणेः सिद्धान्तः। तन्मते विषयता पदार्थान्तरम्, तद्विशेषाः प्रकारता-विशेष्यतादयस्तथैव व्याख्येयाः। सप्तपदार्थीवादिनां वैशेषिकाणां प्रसिद्धिमनुरुध्य तेषां ज्ञाने वा विषये वान्तर्भावः क्लिष्टकल्पनया न साधनीयः। न च सर्व-सम्बन्धानामन्ततो गत्वा स्वरूपसम्बन्धे पर्यवसानाद् विषयताया अपि तथात्वाद्

अतीतानागतयोः स्वरूपतोऽभावात् कथं विषयताख्यस्तयोः सम्बन्धो भवेदिति शङ्कनीयम्, विषयतादीनां वृत्त्यनियामकसम्बन्धत्वात् तस्य च समकालिकसम्बन्धिसत्तानपेक्षणात्। तादृशसम्बन्धानङ्गीकारे स्वस्वामिभावादिव्यवहारो विसंस्थुलो जायेत। यदपि सांख्यवेदान्तमते विषयताया ज्ञाननिष्ठत्वे घटं जानामीति सार्वदिकानुव्यवसायप्रसञ्जनं कृतम्, तदपि तेषां सिद्धान्तं विरुणद्धि। नहि नित्यचैतन्यवादिनां स्वरूपभूतं चैतन्यं विषयमवगाहत इति पक्षः सम्प्रतिपन्नः, वृत्तिज्ञानानामेव सविषयत्वाभ्युपगमात्। वृत्तिरूपज्ञानानामन्तःकरणपरिणामानां क्षणिकत्वमेव तैरास्थीयते, यथा नैयायिकानामात्मविशेषगुणभूतानामिति कः प्रतिविशेषः? वेदान्तिमते विषयताख्यः सम्बन्धोऽनिर्वचनीयस्तत्त्वान्यत्वाभ्यामनिरूपणार्हत्वात्। सांख्यानां च मते यद्यपि ज्ञानचैतन्ययोः सम्बन्धः प्रकाश्यप्रकाशकरूपः, तथापि कोष्ठगत्या तस्यौपचारिकत्वादाध्यासिकत्वमेव पर्यवस्यति। अलं प्रसक्तानुप्रसक्त्या।

भगीरथठक्कुरस्तु ज्ञानस्वरूपमेव विषयत्वं मन्यते। न च ज्ञानस्वरूपस्य सर्वविषयसाधारण्यान्न विषयप्रतिनियमः सिद्ध्येदिति शङ्कनीयम्, भिन्नं भिन्नं ज्ञानस्वरूपं भिन्नभिन्नविषयत्वं क्रोडीकृत्यैव प्रादुर्भवति, तेन न घटज्ञानस्य पटविषयत्वम्। घटसम्बन्धित्वस्य विषयत्वस्य तज्ज्ञानत्वस्य चैकस्मिन् ज्ञानस्वरूपेऽन्तर्भावः, ज्ञानत्वस्य घटविषयत्वस्य च ज्ञानरूपैकधर्मिनिष्ठत्वात्। तथा च घटज्ञानस्वरूपमेव घटविषयत्वम्। ज्ञानस्वरूपाणां भेदेऽपि विषयतायामनुगमो ज्ञानत्वनिबन्धनः, ज्ञानमात्रस्य सविषयकत्वात्। अयं च निष्कर्षः—यथा ज्ञानस्य ज्ञानत्वं स्वरूपम्, एवं विषयत्वमपि। अस्यां तु कल्पनायां बहवः खलु संशया अहमहमिकया समुद्भवन्ति। ज्ञानत्वं विषयत्वञ्च यदि ज्ञानस्वरूपमेव, तर्हि तयोः कीदृशः सम्बन्धः। किं तयोरभेदः, तथात्वे विज्ञानवादे प्रवेशो दुष्परिहरः। अथ विषयत्वं व्याप्यं ज्ञानत्वं व्यापकं तदा विषयप्रतीतिकाले ज्ञानस्य प्रतीतिरवर्जनीया। यत्र विषयत्वं तत्र ज्ञानत्वमिति व्याप्तौ सिद्धायां विषयग्रहणे ज्ञानग्रहणमपरिहरणीयमेव। अथ विषयत्वमेव व्यापकं ज्ञानत्वं व्याप्यं तदा ज्ञानत्वं विहायापि विषयत्वस्य सम्भवे कथं विषयत्वं ज्ञानस्वरूपं स्यात्। नहि ज्ञानं ज्ञानत्वं विहाय सम्भवमासादयेत्। विषयत्वं ज्ञानत्वं विना ज्ञानत्वं च विषयत्वं विना न प्रतिपत्तिपथमवतरेत्। तथा च धर्मकीर्तिमताद्विशेषः। यथोक्तं तेन—

नार्थोऽसंवेदनः कश्चिदनर्थं वाऽपि वेदनम्।
दृष्टं संवेद्यमानं तत् तयोर्नास्ति विवेकिता॥ इति।
(प्र० वा० २३५)

अर्थोऽनुभवमन्तरेण न कश्चिद् दृष्टः, वेदनञ्च अर्थं विना न दृष्टं संवेद्यमानम्। तस्मात्तयोरर्थतदुपलम्भयोर्विवेकिता नास्तीति ज्ञानविषययोरव्यतिरेकित्वं धर्मकीर्तेरिव भगीरथस्यापि सम्प्रतिपन्नं भवेत्। अथोभयोः परस्पराविनाभावेन प्रतीतयोरपि नाभेदो जातिव्यक्तिवद् गुणद्रव्यवद्वा स्वरूपभेदेऽपि एकवित्तिविषयत्वं न त्वभेद इत्यास्थीयते, तदा ज्ञानमज्ञातं सदेव विषयस्य प्रकाशकमिति मतप्रतिष्ठापने कथमागृह्यते नैयायिकैः। विषयताख्यपदार्थान्तरस्वीकारेण तयोर्भेदो यद्यपि सूपपादस्तथापि तं परित्यज्य ज्ञानस्वरूपे विषयतामन्तर्भावयितुं नव्यनैयायिकानां प्रयासो विज्ञानवादं प्रत्यासन्नीकरोति। अतो बाह्यपदार्थरक्षणपरैरस्मिन् नव्यमतेऽतितरामभिनिवेशो न कार्यः। ज्ञानविषययोः स्वाभाविकः सम्बन्धः समवायरीत्या न खल्वनुपपादनीयः।

क्षणिकविज्ञानवादः

नव्यविज्ञानवादप्रस्थाने दिङ्नागधर्मकीर्तितदनुयायिभिः प्रवर्तिते क्षणिकमेव विज्ञानं सन्तन्यमानं स्थिरत्वविभ्रममुपजनयति, विषयश्च ज्ञानादव्यतिरिक्तः— "विज्ञप्तिमात्रमेवेदं त्रैधातुकम्, तच्च विज्ञानं प्रतिसत्त्वसन्तानभेदादनन्तमविशुद्धञ्चानधिगततत्त्वानाम्, विशुद्धं च प्रहीणावरणानां प्रतिक्षणविशरारु च सर्वप्राणभृतामोजायते" (त० सं० ५५०) इति प्रतिपाद्यते। अत्र त्रयो विषया विचारणीयाः— आद्यो विज्ञानं क्षणिकमिति, द्वितीयः सन्तन्यमानतया अनन्तमिति, प्रतिसत्त्वसन्तानं विज्ञानानां भेद इति तृतीयः। विज्ञानानां क्षणिकत्वं सौत्रान्तिकप्रवर्तितं क्षणभङ्गवादमवष्टभ्यैव प्रतिपादनीयम्। अर्थक्रियाकारित्वं सत्त्वमिति सिद्धे क्षणभङ्गवादस्य कथमपि प्रतिष्ठा भवेदपि। अर्थक्रियाकारित्वस्य च पूर्वमेवास्माभिः सत्त्वलक्षणत्वमपहस्तितम्। अर्थक्रियाया भ्रान्तेऽपि विज्ञाने दर्शनाद् भ्रमस्य च असत्ख्यातिरूपतया अन्यत्र सती अर्थक्रिया भ्रमविषयिणी भवतीत्यन्यथाख्यातिवादिनां मतमाश्रित्य यथार्थावगाहित्वं सौत्रान्तिकैर्विज्ञानवादिभिर्वा नाङ्गीक्रियते। अतस्तन्मतानुसारेणासत्या

अपि अर्थक्रियायाः सम्भवात्तदवष्टम्भेन विज्ञानस्य क्षणिकत्वं दुःसाधमेव। विज्ञानानामपि परस्परं भेदो विषयभेदमादायैव सम्भवेत्। विषयाश्च न वस्तुसन्तः सम्भवन्ति यथा सौत्रान्तिकैर्मन्यन्ते। सौत्रान्तिकानां मते यद्यपि विषयाः साक्षाज्ज्ञानेन नाधिगम्यन्ते तथापि ज्ञाने स्वाकारं समर्पयन्ति। तत्तदाकारदर्शनञ्च तत्तद्विषयदर्शनमित्यनुभवितॄणामध्यवसायः। अस्मिंस्तु विज्ञानवादिदर्शने बाह्यविषयाणामसद्भावे प्रतिपादिते आकारद्वारेण बाह्यविषयज्ञानं भवतीत्यसम्भवदुक्तिकमेव। आकारास्तु वासनासमुद्भवा विज्ञाने प्रतिभासन्ते। वासनाश्च पूर्वप्रतीतिजन्या विज्ञानसन्ताने आधीयन्ते। तासाञ्च कालेन परिपाकवशात्तथा तथा विषयाकारेण प्रादुर्भावो भवति। आकारास्तु न सन्तः, विज्ञानस्य ज्ञानज्ञेयात्मकद्वैरूप्याभावात्। यदि आकारा वस्तुसन्तो भवेयुस्तर्हि एकस्यैव ज्ञानस्य नानारूपावभासिनो नानात्वं स्यात्। तथा चोक्तम्—"अन्यथैकस्य भावस्य नानारूपावभासिनः। सत्यं कथं स्युराकारास्तदेकत्वस्य हानितः॥" इति (प्र० वा० २२६)। यदि आकारा असन्त एव तर्हि तैः कथं ज्ञानस्य परस्परं भेदः सम्पाद्येत, यदि तेऽकिञ्चिद्रूपा अलीका भवेयुस्तदा ज्ञानं केन विशेष्यताम्। अथ अलीका अपि भेदका भवन्तु। यथा नैयायिकानां सत्त्वेनाविशिष्टानामप्यलीकानां नीलपीतादिरूपेण भेदः स्यादिति चेत्? तत्किं नीलपीतादयोऽलीकाद्भिन्नाः? तर्हि अनलीका भवेयुः। अथ अभिन्नाः, तदा कथं तेषां ज्ञानभेदकत्वम्। नह्यलीकैरापाद्यमानो भेदोऽनलीको भवितुमर्हति। तथा चाकाशेन कृतो ग्रन्थिराकाशेनैव मोचित इत्याभाणकविषयतां नातिवर्तेत। न च विचारासहत्वात् तेषामलीकत्वमध्यवसीयत इति वाच्यम्, प्रतिज्ञैकदेशत्वाद्धेतोः। यदेव विचारासहं तदेवालीकं तुच्छमित्युच्यते। नहि किञ्चिद्रूपं नीलादि, अथ च विचारासहमित्युक्तेऽपि संभवः। एवमाकाराणामसत्त्वे ज्ञानभेदाभावः। सत्त्वे च ज्ञानादाकाररूपस्य ग्राह्यस्य भेद इति विज्ञानाद्वैतसिद्धान्तहानेस्तत्परिहारार्थम्—"प्रविश अनिर्वचनीयख्यातिकुक्षिम्, तिष्ठ वा मतिकर्दममपहाय न्यायनयानुसारेण नीलादीनां पारमार्थिकत्वे" इत्युदयनाक्षेपो वज्रलेपायेत। तथा च ग्राह्यस्य ग्राहकाद् भेदाभेदाभ्यामनिर्वाच्यत्वान्न तेन ग्राहकज्ञानस्य वास्तवो भेदः शक्यसम्पादः। ग्राह्याणां नीलधवलादीनां भेदं विना न ज्ञानानां प्रतिनियततद्विषयकाणां भेदः सिद्ध्येत्। तथात्वे औपनिषदसिद्धान्तस्य 'एकमेवाद्वितीयं ब्रह्म' इत्यद्वैतपरस्यैवोपादेयत्वम्, न तु विज्ञानभेदवादस्य

बौद्धकल्पितस्य युक्तिविरुद्धस्य। तथा चोक्तमुदयनाचार्येण "न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिस्तद्बाधने बलिनि वेदनये जयश्रीः। नो चेदनिन्द्यमिदमीदृशमेव विश्वं तथ्यं तथागतमतस्य तु कोऽवकाशः॥" (आ० त० वि० ५२६) इति।

भवतु नाम स्थिरविज्ञानसिद्धिस्तथा च नित्यात्मसिद्धौ आत्मदर्शिनो मोक्षाभावः। तथा हि—आत्मदर्शी तदुपकारिणि रज्यते, तदपकारिणश्च विद्वेष्टि। रागद्वेषौ च संसारस्य मूलम्, यस्तु नैरात्म्यदर्शी तस्य न कोऽप्युपकारी न वा अपकारी, अतो न तस्य रागद्वेषौ स्तः। अतो नैरात्म्यमेव भावनीयमिति चेदुच्येत, अनात्मदर्शिनो मुमुक्षुत्वाभावात्। नहि आत्मानमप्रतिसन्धाय कश्चित् सुखावाप्तये दुःखहानाय वा प्रयतते। आत्मन एव स्वर्गापवर्गकामनया प्रवृत्तिनिवृत्तिमार्गावलम्बनम्। इयं प्रत्युत नैरात्म्यदृष्टिर्नास्तिक्यमेव द्रढयेत्। तथा च देहात्मवादिनो लोकायतिकस्यैव सर्वत्र विजयः स्यात्। न च दुःखहेतुत्वादिन्द्रियादिवदसौ आत्मापि हीयतामिति चेत्? उच्यते—यादृशो दुःखहेतुस्तादृशो हेय एव, देहाद्युपाधिमांश्च तथा। निरुपाधिश्च आत्मा कथं हीयताम्, अशक्यत्वान्निष्प्रयोजनत्वाच्च। नहि तस्य विनाशो नित्यत्वात्। नापि विप्रयोगो विभुत्वात्। नापि ज्ञानाभावद्वारेण, यथा यथा तदर्थं यत्नस्तथा तथा ज्ञानस्यैवानुवृत्तेः। तथा हि—न रागद्वेषौ आत्मनिबन्धनौ। अनात्मानं देहमेव आत्मानं मन्यमानोऽतत्त्वदर्शी तदनुकूलेषु रज्यते प्रतिकूलेष्वपरज्यते। न चैतत्केवलमात्मदर्शिनः सम्भवति, निरुपाधेः पुत्रवित्तैषणायाः समुत्थानात्, तैरनुपकार्यत्वाच्च। ततोऽनात्मन्यात्मग्रहो निदानं संसारस्य। तत्त्वज्ञानेन मिथ्याज्ञाने निवृत्ते सति संसारस्य तत्कारणाभावान्निवृत्तिः। अतो नैरात्म्यवादः केवलमविचारितवस्तुतत्त्वस्य वैराग्यातिशयप्रवर्तितः।

विज्ञानवादप्रक्रिया

वसुबन्धुकृतत्रिंशिकायां विज्ञानवादप्रक्रिया इत्थं व्युत्पादिता—विज्ञानमेव तत्त्वम्। तस्य त्रिविधः परिणामः—विपाकः, मननम्, विषयविज्ञप्तिश्चेति। तत्र विपाक आलयविज्ञानं सर्वबीजकं सर्ववासनानां तत्रैव आलीयमानत्वात्। तच्च आलयविज्ञानं न एकं नित्यं किन्तु विज्ञानपरिणामभूतोऽनादिकालिकः प्रवाहः। तच्च क्षणिकमेव, परिणामस्य क्षणिकत्वात्। परिणामश्च अन्यथात्वं कारणक्षणनिरोधसमकालस्त-

द्विलक्षणाकार्यस्यान्मलाभलक्षणः। तत्रैव आत्मादिविकल्पवासनापरिपोषाद् रूपादिविकल्पवासनापरिपोषाच्चालयविज्ञानाद् आत्मादिविकल्पः, रूपवेदनादिस्कन्धविकल्पश्च तत एवोत्पद्यते। आलयविज्ञानात् तदालम्बनं मनोविज्ञानम् आत्मदृष्ट्यात्ममोहात्ममानात्मस्नेहसंज्ञितैः क्लेशैरनुविद्धमुद्भवति। तृतीयस्तु परिणामः षड्विधस्य रूपशब्दगन्धरसस्प्रष्टव्यधर्मात्मकस्य षडिन्द्रियगोचरस्य यैवोपलब्धिस्तदात्मकः। एते च विकल्पा न वस्तुसन्तः, किन्तु परिकल्पिता एव। तथा चोक्तम्—"आध्यात्मिकं बाह्यं यावद् बुद्धधर्माः सर्वं तत्परिकल्पितस्वभावमेव" इति। परतन्त्रस्वभावस्तु हेतुप्रत्ययजन्यः। परिनिष्पन्नो भावस्त्वविकारी सर्वकालं ग्राह्यग्राहकादिकल्पनारहितः। स एव परमार्थः, आकाशवद् विकारित्वात्, विमलत्वात्, एकरूपत्वाच्च। सर्वकालं तथाभावस्तथतेत्युच्यते। तत्र परिकल्पितो वेदान्तिनां प्रातिभासिकस्थानीयः, परतन्त्रश्च व्यावहारिकस्थानीयः, परिनिष्पन्नस्तु पारमार्थिकस्थानीयः। अस्मिन्नेव शुद्धविज्ञानमात्रत्वे सत्त्वस्यावस्थितिर्निर्वाणमुच्यते। संसारश्च आ आलयविज्ञानाद् आ च विषयविज्ञप्तेः प्रवर्तते। आलयविज्ञानं सांख्यप्रोक्तमहत्तत्त्वस्थानीयम्, मनोविज्ञानमहङ्कारस्थानीयम्, प्रवृत्तिविज्ञानानि च षड्विधज्ञानेन्द्रियज्ञानस्थानीयानि। आलयविज्ञानञ्च विज्ञानपरिणामेत्युक्तम्, परिणामश्च क्षणिकः सांख्यीयप्रकृतिपरिणामवत्। यत्परिणामोपादानभूतमाद्यं विज्ञानमुक्तम्, तच्च पौर्वकालिकमालयविज्ञानरूपमेवेत्यस्माकं प्रतिभाति। नहि परिनिष्पन्नस्वभावस्य तथतालक्षणस्याऽविकारिणो ग्राह्यग्राहकरहितस्याद्वयस्य विज्ञानस्य क्षणिकपरिणामोऽन्यथाभावलक्षणः सम्भवति, तस्य सर्वकालमविकारित्वात्, सर्वविधक्लेशादिदोषास्पृष्टतया विद्यमानत्वाच्च। परिणामस्तर्हि ईदृशस्य नित्यस्य एकरूपस्य विवर्तरूप एवाध्यवसातव्यः, अतत्त्वतोऽन्यथाभावात्। विज्ञप्तिमात्रतायामवस्थानमेव सर्वकल्पनाविवर्जनान्निर्वाणम्। तस्य खलु स्वरूपमेवं निरूपितं वसुबन्धुना—

"अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत्। आश्रयस्य परावृत्तिर्द्विधा दौष्ठुल्यहानितः॥ स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः। सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः॥" इति।

अतिगम्भीरार्थमेतच्छ्लोकद्वयं व्याख्यागम्यमिति स्थिरमतेर्व्याख्यानुसारेण वर्णयामः। ग्राहकाभावादचित्तः, ग्राह्याभावादनुपलम्भः, निर्विकल्पत्वाल्लोकादुत्तीर्णं

ज्ञानमिति लोकोत्तरं ज्ञानम्। आश्रयस्य आलयविज्ञानस्य दौष्ठुल्यविपाकवासनाद्वय-विरहेणाद्वयज्ञानभावेन परावृत्तिलक्षणश्च। शुद्धविज्ञानस्यैव सर्वविज्ञानपरिणामेष्वनुगमात् क्लेशावरणलक्षणस्य ज्ञेयावरणलक्षणस्य च दौष्ठुल्यप्रहाणादियमाश्रय-परावृत्तिर्लभ्यते। स एव चानाश्रवो धातुराश्रयपरावृत्तिरूपः। अनास्रवश्च दौष्ठुल्यहानात्, आर्यधर्महेतुत्वाच्च धातुशब्दवाच्यः, अचिन्त्यस्तर्कागोचरत्वात्, प्रत्यात्मवेद्यत्वात्, लौकिकदृष्टान्ताभावाच्च। कुशलश्च अनाश्रवत्वात्, ध्रुवो नित्यत्वाद् अक्षयतया। सुखञ्च नित्यत्वादेव, यदनित्यं तद् ुःखम्, अयञ्च नित्य इति। विमुक्तकायः क्लेशावरणप्रहाणात्। महामुनेर्धर्मकाय आश्रयपरावृत्तिलक्षणः क्लेशज्ञेयावरणप्रहाणात्।

अयञ्च धर्मकायः किं प्रतिसत्त्वसन्तानं भिन्नः, आहोस्विदेकमेव तत्त्वं सर्वसत्त्वसाधारणभूतमौपनिषदब्रह्मवदिति विचारमपेक्षते। महायानसूत्रालङ्कारे आचार्यासङ्गप्रणीते परमार्थतत्त्वमित्थं निरूपितम्—"न सन्न चासन्न तथा न चान्यथा न जायते व्येति न चावहीयते। न वर्धते नापि विशुध्यते पुनर्विशुध्यते तत्परमार्थलक्षणम्॥" (म० सू० २२)। अद्वयार्थः परमार्थः, परिकल्पितपरतन्त्रलक्षणाभ्यां परिनिष्पन्नस्य एकत्वाभावात्। न चान्यथा ताभ्यामेवान्यत्वाभावात्, परिकल्पितपरतन्त्रयोस्तदधिष्ठानेनैवात्मलाभात्। यथा वेदान्तनये प्रातिभासिकव्यावहारिकयोः। न जायते न च व्येतीत्यसंस्कृतत्वाद् धर्मधातोर्वृद्धिर्व्ययाभावश्च, संक्लेशव्यवदानावस्थयोर्निरोधोत्पादयोस्तदवस्थत्वात्। नित्यशुद्धस्य हि कथं वा क्लिष्टत्वं कथं वा विशुद्धिः, प्रकृत्या असंक्लिष्टत्वात्। आगन्तुकक्लेशविगमाद् विशुद्ध्यतीव। न चात्र आत्मदृष्टिः, सा च पञ्चोपादानस्कन्धानुपादाय प्रवर्तते। भ्रम एवायं या आत्मदृष्टिः, तादृशभ्रमक्षय एव मोक्षः। न तु कश्चित् परमार्थतो बध्यते मुच्यते वा। "सर्वधर्माश्च बुद्धत्वं धर्मो नैव च कश्चन", सर्वधर्माश्च बुद्धत्वम्, तथताया अभिन्नत्वात्। बुद्धत्वस्य च न कश्चिद्धर्मोऽस्ति, परिकल्पितेन धर्मस्वभावेन शुक्लधर्ममयं च बुद्धत्वमुच्यते। "यथाम्बरं सर्वगतं सदामतं तथैव तत्सर्वगतं सदामतम्। यथाम्बरं रूपगुणेषु सर्वगं तथैव तत्सत्त्वगणेषु सर्वगम्॥" (म० सू० ३६-१५)। बुद्धत्वस्य सर्वगत्वमाकाशसाधर्म्येणात्र प्रदर्शितम्, सत्त्वगणेषु सर्वगतत्वं बुद्धत्वस्यात्मत्वेन सर्वसत्त्वोपगमेन च परिनिष्पत्तितो वेदितव्यम्। एतेनैकमेव बुद्धत्वं तथतारूपं सर्वसत्त्वगतं प्रतिपन्नं भवति। नैरात्म्यस्वरूपञ्चेत्थं विवृतम्—"शून्यतायां विशुद्धायां

नैरात्म्यान्मागलाभतः । बुद्धाः शुद्धात्मलाभित्वाद् गता आत्ममहात्मताम् ॥"
(म० सू० ३७, २३) । अनाश्रवे धातौ नैरात्म्यं विशुद्धा तथता बुद्धानामात्मा स्वभावः,
अतः शुद्धात्मलाभित्वाद् बुद्धा आत्ममाहात्म्यं प्राप्ताः । अनेन सर्वजीवाधिष्ठानभूतं
सर्वप्रपञ्चाश्रयभूतञ्च आत्ममाहात्म्यमुद्भावितम् । अथ यदि बुद्धो मोक्षे आत्म-
माहात्म्यं लभते, तर्हि कथं भवति तथागतो मरणाद् भवति वा न भवति वेति प्रश्नेऽ-
व्याकृतनयः समाश्रितो बुद्धेनेति । अत्र प्रतिविधीयते—बुद्धत्वं न भावः, पुद्गल-
धर्माभावलक्षणत्वात्, बुद्धत्वस्य जीवधर्मत्वाभावात् । नापि बुद्धत्वमभावस्तथता-
लक्षणभावात् । अतोऽव्याकृतमेतदित्युक्तम् । नहि बुद्धत्वं प्राप्तः शाक्यमुनिर्जीव-
विशेषो भवति, तद्घटकानां पञ्चोपादानस्कन्धानां विगमात् । नाप्यभावं प्रतिपद्यते,
तथतालाभात् । तथता चैकमेव तत्त्वम् । ईदृशं च नैरात्म्यव्याख्यानमौपनिषदब्रह्मवादेन
सर्वथा तादात्म्यमाविष्करोति । इयञ्च तथता सर्वजीवसाधारणीति स्वकण्ठेनैवोक्तम्—
"सर्वेषामविशिष्टापि तथता शुद्धिमागता । तथागतत्वं तस्माच्च तद्गर्भाः सर्वदेहिनः ॥"
इति (म० सू० ४०-३७) ।

सर्वेषां निर्विशिष्टा तथता तद्विशुद्धिस्वभावश्च तथागतः । अतः सर्वे सत्त्वास्तथागतगर्भा उच्यन्त इति विचारेणाद्वैततत्त्वमेव विज्ञानानां निर्विचिकित्सं प्रतीतिगोचरो भवति । अपि च बुद्धबहुत्वमपि नेष्यते, बुद्धानां धर्मकायस्याभेदादनाश्रवे धाताविति । पुनश्च या परिकल्पितेन स्वभावेनाविद्यमानता सैव परमा विद्यमानता परिनिष्पन्नेन स्वभावेन । यश्च सर्वथाऽनुपलम्भः परिनिष्पन्नस्य स्वभावस्य स एव परम उपलम्भः परिनिष्पन्नस्वभावस्येति च स्पष्टं शून्यताया निराकरणं विज्ञानाद्वैतस्य च सुस्पष्टं प्रतिपादनं दृष्टं भवति । मध्यान्तविभागटीकायां विज्ञानं भावरूपमेव ग्राह्यग्राहकशून्यत्वाच्छून्यमुच्यते, न तु सर्वथाभावरूपम् । एवं स्थिते यत्खलु दिङ्नागधर्मकीर्तिप्रवर्तिते विज्ञानवादे विज्ञानं क्षणिकम्, क्षणिकानां विज्ञानानां परस्परं भेदः, प्रतिसत्त्वसन्तानञ्च विज्ञानभेदः सिद्धान्तीकृतः, स च सिद्धान्तः प्राचीन-सिद्धान्तं विरुणद्धि; अथ चायमेव सौत्रान्तिकवासनाप्राबल्यादौपनिषदसिद्धान्तप्रद्वेषाद्वाऽर्वाचीनैर्बौद्धदार्शनिकैः शान्तरक्षितज्ञानश्रीरत्नकीर्तिपर्यन्तैरहमहमिकया व्युत्पादितः । एतस्यार्वाचीनस्यैव विज्ञानवादस्य सप्रपञ्चं खण्डनं दार्शनिकान्तरैरनुष्ठितम्, न तु प्राचीनस्य विज्ञानवादप्रस्थानस्य ।

भगवान् शङ्कराचार्यः—"नासतो विद्यते भावो नाभावो विद्यते सतः" इत्यस्य गीताश्लोकस्य भाष्ये सत्त्वासत्त्वयोर्विनिगमकं प्रमाणमुपन्यस्य शून्यवादं प्रत्याचख्यौ। असतोऽविद्यमानस्य सकारणस्य कारणव्यतिरेकेणानुपलब्धेरसत्त्वं सिध्यति। यत्स्वभावेन सत् तत्कदापि सत्त्वं न विजहाति। "एकरूपेण ह्यवस्थितो योऽर्थः स परमार्थः" इति ब्रह्मसूत्रतर्कपादभाष्ये सत्त्वलक्षणमाचक्षाणस्तमेव सिद्धान्तं द्रढयति। अभ्यासेन निरूप्यमाणं वस्तु तात्पर्यगोचरो भवतीति शास्त्रविदां मतम्। कार्यञ्चोत्पत्तिप्रध्वंसाभ्यां प्रागनन्तरञ्चानुपलब्धेरसदित्यवसातव्यम्। नागार्जुनोऽपि सर्वं प्रतीत्यसमुत्पन्नं वस्तु शून्यमिति प्रतिपादयाञ्चकार। कारणस्यापि कारणान्तरोत्पन्नत्वादसत्त्वे प्राप्ते सर्वाभावप्रसङ्ग इति चेत्? न, सदसद्विभागो हि बुद्धितन्त्रः। तत्र यद्विषया बुद्धिर्व्यभिचरति तदसत्, यद्विषया च बुद्धिर्न व्यभिचरति तत्सदिति निरूपणीयम्। सर्वत्र च विषये द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे। न च यथा नीलोत्पलमिति सामानाधिकरण्ये नीलत्वमुत्पलं विहायान्यत्र दृष्टम्, उत्पलञ्च नीलत्वं परित्यज्य वर्णान्तरं परिगृह्णद् दृश्यते, नैवं सद्बुद्धिर्व्यावर्तते। नागार्जुनाच्छङ्कराचार्यस्यायमेव सुमहान् भेदो यन्नागार्जुनेन सर्वमसत्प्रख्यातीति निरूप्यते, न तथा शङ्कराचार्येण। सर्वत्रैव हि भ्रमे सत्यानृते मिथुनीकृत्यैव विषयस्य प्रतीतिर्भवति। न हि सत्तामविषयीकृत्य किमपि प्रतीयते नाम।

एवं सदसद्विभागव्यवस्थायां किं सत्किमसदिति निर्णयोऽन्वयव्यतिरेकाभ्यामीषत्करो भवति। तथा हि सन् घटः सन् पटः सन् हस्तीत्येवं सर्वत्रैव विशिष्टबुद्धिरोजायमाना उपलभ्यते। तत्र घटबुद्धिविषयोऽसन्न तु सद्बुद्धिविषयोऽव्यभिचारादिति व्यवसातव्यम्। घटे विनष्टे सद्बुद्धिर्नोपलभ्यत इति तस्यापि व्यभिचार इति चेत्? न, सद्बुद्धिर्विशेषणविषया घटादिविशेष्याभावे न समुदाचरद्वृत्तितां लभत इति न तस्य व्यभिचारः शङ्कनोयः। वस्तुतस्त्वभावस्याधिकरणस्वरूपत्वात् तदनतिरेकाच्च नष्टेऽपि घटेऽनुत्पन्ने वा कपालादिविषया सद्बुद्धिस्तत्राप्यनुवर्तत एवेति न कुत्रापि सत्ताबुद्धेर्व्यभिचारः। तस्मात् सत्ता वस्तुमात्रस्य स्वभाव इत्यकामेनाप्यभ्युपेतव्यम्। अथ कथमसता विशेष्येण सत्तायाः सामानाधिकरण्यबुद्धिः संभवेदिति चेत्, सदसतोर्मिथुनीकृत्य प्रतीतेः सार्वत्रिकत्वात्। सद्रूपस्य आत्मनस्तु सर्वत्राव्यभिचारान्न कदाप्यसत्ता शक्यशङ्का। एवं ज्ञानस्यापि कुत्रापि न असत्त्वम्, ज्ञानं नास्तीत्युक्तिः स्वज्ञान-

विरुद्धा, इदं न जानामीत्युक्तिवत्, यथा यथा ज्ञानस्याभावे प्रयत्नस्तथा तथा ज्ञानस्यैव प्रतीतेः। मयि ज्ञानाभाव इत्युक्तिरपि ज्ञानेनैव संभाव्यते, अभावज्ञानस्य सद्भावात्। उक्तञ्च पञ्चदश्याम्—"सर्वबाधे न किञ्चिच्चेद् यन्न किञ्चित्तदेव तत्" इति, "शून्यस्यापिससाक्षित्वादन्यथा नोक्तिरस्य ते" इति च। एवं ज्ञानस्य परमार्थसत्ता नापह्नोतु शक्या। अथ सत्ता च ज्ञानञ्चेति किं वस्तुद्वयमुताहो एकमेव? नाद्यः, तथात्वे सत्तायाः सिद्धिर्ज्ञानाधीनैव वक्तव्या, ज्ञानविषयत्वे तस्या अनिर्वाच्यत्वप्रसङ्गात्, विषयस्य ज्ञानाद् भेदाभेदाभ्यामनिर्वाच्यत्वेन मिथ्यात्वात्। न च सत्ता मिथ्येति वक्तुं शक्यम्, बाधाभावादव्यभिचाराच्चेति प्रदर्शितं प्राक्। तर्हि सत्तैव केवला तत्त्वमस्तु किं ज्ञानेन तत्त्वान्तरेणेति चेन्न, ज्ञानाभावे सत्ताया एवासिद्धेः। ज्ञानमेव तह्येकं तत्त्वमास्ताम्, न, तस्य सत्ताविरहेऽसत्त्वप्रसङ्गात्। अतः सत्ता ज्ञानञ्चेत्यद्वैतम्। तस्य नित्यत्वेनापरिच्छिन्नत्वेनात्मनो निरुपाधिकप्रेमविषयत्वेन च श्रुतिप्रामाण्येन चानन्दरूपत्वमङ्गीकर्तव्यमेव। अतः प्रामाणिकैः शून्यवादसिद्धान्तोऽपहस्तित औपनिषदसिद्धान्तश्च स्वहस्तितः। दृष्टश्चास्माभिर्नैयायिकस्यापि सत उदयनाचार्यस्याद्वैतमते पक्षपातः। न च तद्व्याख्यातॄणां मतमनुरुध्योदयनाचार्यस्य औपनिषदसिद्धान्ते समादरो व्याजमात्रमिति तात्पर्यवर्णनेनोदयनाचार्यस्य कापटिकत्वमुद्घोषणीयमिति शम्॥

बौद्धन्यायविमर्शः

डॉ० सातकडिमुखर्जी, नालन्दास्थपालिशोधसंस्थानसंचालकः ।

दिङ्नागाचार्येण प्रमाणसमुच्चयादिकान् बहून् ग्रन्थान् विरचय्य अक्षपादप्रणीतन्यायसूत्रस्य वात्स्यायनप्रणीभाष्यस्य च बहुशो दूषणाभिधानेन बौद्धन्यायशास्त्रस्य सम्प्रदायः प्रवर्तितः । तदनन्तरकालिकेन उद्योतकरेण वसुबन्धुदिङ्नागाचार्यकृतदूषणानां नागार्जुनादिशून्यवादिभिः प्रमाणप्रमेयादिकमधिकृत्य ये खलु आक्षेपाः कृतास्तेषां च खण्डनार्थं वात्स्यायनभाष्यस्य वार्त्तिकं प्रणायि । उक्तञ्च तेन ग्रन्थारम्भे—"यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद । कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः ॥" इति । प्रतिवादिनामग्राहं कुत्रापि तेषां दूषणानां खण्डनं न विहितमुद्द्योतकराचार्येण । वाचस्पतिमिश्रेण तात्पर्यटीकायामेतदैतिहासिकं रहस्यं समुद्भिन्नम्—"यद्यपि भाष्यकृता कृतव्युत्पादनमेतत्तथापि दिङ्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेनाच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्द्योतकरेण स्वनिबन्धोद्द्योतेन तदपनीयते" इति । स्वयञ्च—"ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा । न्यायवार्त्तिकतात्पर्यटीकाऽस्माभिर्विधास्यते ॥" इति ब्रुवतार्वाचीनैर्धर्मकीर्तिशान्तरक्षितप्रभृतिभिः प्रतिसमाहितानामुद्योतकरदूषणानां प्रतिविधानार्थं तात्पर्यटीकाया विरचनं कृतमित्यभिव्यञ्जितम् । प्राचीनभारतवर्षस्य शास्त्ररचनाशैलीमपरिचिन्वन् एतेषां व्याख्यातॄणां व्याख्यापरम्परारहस्यं नावबोद्धुं क्षमेत कश्चिद् आधुनिकरीतिमात्रमवगच्छन् । नहि इमा व्याख्यापरम्पराः केवलं मूलग्रन्थार्थानुसन्धाने एव व्याप्रियन्ते, अपि तु यैः खलु विरोधिदार्शनिकप्रस्थानमनुरुन्धानैर्न्यायसिद्धान्ते समाक्षेपा गुरुशिष्यसम्प्रदायक्रमेण समुद्भावितास्तेषां प्रतिविधानार्थमेव एतासां संरम्भः । उद्योतकरप्रोक्तानां कुमारिलभट्टोद्भावितदूषणानाञ्च धर्मकीर्तिप्रभृतिभिर्निरसनं कृतम्, अतस्तत्प्रतिसमाधानार्थं वाचस्पतिमिश्रेण तात्पर्यटीका रचिता । सा पुनर्ज्ञानश्रीरत्नकीर्तिप्रभृतिभिः परीक्ष्य खण्डिता । तेषाञ्च खण्डनानां निराकरणार्थमुदयनाचार्येण परिशुद्धिनाम्नी टीका

रचिता, अन्ये च न्यायकुसुमाञ्जलिबौद्धाधिकारापरपर्यायात्मतत्त्वविवेकादयः स्वसिद्धान्तरक्षणतात्पर्येण व्यरचिषत। बहवः खलु न्यायशास्त्रे ग्रन्थकर्त्तारः प्रादुरभवन्। परन्तु तेषां ग्रन्था: कालमाहात्म्याद् अस्मद्दौर्भाग्याच्च कालकवलीभूताः। केवलं तत इतो बौद्धदार्शनिकैरनूदितानि वाक्यानि समुपलभ्य तेषां सत्ता अनुमानमात्रविषयतां भजते। न केवलं बौद्धदार्शनिकग्रन्थानां विलोपः समजनि, अपि तु वैदिकमार्गानुयायिनां परःसहस्रा ग्रन्थाः कालधर्ममुपागताः। कर्वाचिच्च नामशेषत्वं बिभ्राणाः क्लिश्नन्ति विविदिषूणां चित्तानि। नैतच्चित्रं यदतिविपुलव्यवसायशालिनामपि प्राचीनशास्त्रपरिज्ञानं साधनाभावाद् एकदेशदर्शितादोषं नातिक्रामति।

एतत्तु सर्वथा असंशयितमेव यत् खलु यावत्पर्यन्तं बौद्धा विद्वांसो न्यायमीमांसादिदर्शनानामपाकरणार्थं ग्रन्थं व्यरचयन् तावत्पर्यन्तमास्तिकदार्शनिकानामपि क्रियासमभिहारेण ग्रन्थादीनां रचनमविच्छिन्नप्रवाहेण प्रावर्तिष्ट। खृष्टद्वादशशतकानन्तरं तुरुष्कदेशीयानां साम्राज्ये प्रतिष्ठिते भारतवर्षाद् बौद्धधर्मावलम्बिनां विद्रावणे कृते तेषाञ्च शास्त्राणां विप्रलोपे सम्पादिते वैदिकदार्शनिकचिन्तापि निरिन्धनानलवद् निःसपत्नताबोधजनितमालस्यमौदासीन्यञ्च प्राप्ता नवतत्त्वाविष्करणेऽनीशा संवृत्ता। नव्यन्यायप्रस्थाने गङ्गेशोपाध्यायोपक्रमे केवलं गुरुमतस्यैवससंरम्भं परीक्षणं कृतम्। बौद्धादीनां मतखण्डने मृतमारणन्यायेन प्रयासमप्रयोजनमध्यवसाय स्वयूथ्यैर्विवाद एव तेषां पुरुषकारः पर्यवसन्नोऽभूत्। कथं वा प्रतिरोधिनामभावे आत्मसंरक्षणार्थं प्रयत्नः संभवेत्। अधुनातनानां विदुषां तु तत्तन्मतपरिज्ञानार्थं प्रयतमानानामपि चिन्ताशक्तिर्जीवद्रूपप्रतिद्वन्द्विनामभावे परिपोषकाष्ठामनधिगच्छन्ती केवलं स्वपरचित्तरञ्जनार्थतामेव संपिपादयिषति। न केवलमस्माकं भारतीयानामेवैतादृशी दशा समुदपादि, किन्तु चीनभोटजापानादिदेशवास्तव्यानां बौद्धपण्डितानां भारतीयबौद्धपण्डितानां साहाय्यकमलभमानानां दार्शनिकी चिन्ता केवलं प्राचीनसिद्धान्तगवेषणायां पर्यवसिता नवीनं तत्त्वमनाविष्कुर्वती कथमपि ध्रियमाणा न सम्प्रतितनानां दार्शनिकानां चमत्काराय सामर्थ्यमुद्भावयति। आशास्थानमेतद् यत् पुनरपि भारते वर्षे विश्वविद्यालयेषु तदर्थं प्रतिष्ठितासु नानासंस्थासु च बौद्धशास्त्राणां परिशीलनं पुनः प्रवर्त्यमानं दृश्यते। बौद्धसमयानुसारि-

देशेभ्यो पण्डिता विद्यार्थिनश्च समागच्छन्ति, भारतीयाश्च तैः सार्धं सामरस्यमनुभवन्तो भारतवर्षस्य प्राचीनमैश्वर्यमुपलभन्ते । यदि भोटचैनिकभाषादिषु रक्षितानां बौद्धशास्त्राणां पुनर्भारतीयभाषायां प्रत्यापत्तिः संघटेत तदा बौद्धशास्त्रचिन्ता वैकल्यं परिहृत्य साकल्यं समासादयिष्यति ।

अधुना प्रमेयाणां बाहुल्यात् तेषां च परीक्षणस्य ग्रन्थबाहुल्येनैव शक्यसम्पादनत्वान्न तेषां विचारोऽत्र चिकीर्ष्यते। केवलं कतीनाञ्चिदत्रोपन्यासः क्रियते विविदिषूणां जिज्ञासोत्तम्भनार्थम् । दिङ्नागकृतः प्रमाणसमुच्चयोऽद्यत्वे नोपलभ्यते। भोटभाषातः संस्कृतभाषायां तच्छाया संपिपादयिषितापि प्रामाणिकव्याख्यादिविरहेण सम्प्रदायविच्छेदाच्च न निःसंशयितां व्युत्पत्तिमाधातुमीष्टे । अतो धर्मकीर्तिकृताश्चतुःपञ्चा ग्रन्था एवास्माकमुपजीव्या भवन्ति तदर्थप्रतिपत्तौ । इन्द्रियादेः प्रामाण्यमवधूय ज्ञानस्यैव प्रमाणतामभ्युपयन्ति बौद्धप्रमाणशास्त्रप्रणेतारः। प्रमाणस्य च सामान्यलक्षणमविसंवादकत्वमेव प्रतिपादितम् । तच्च वात्स्यायनेनैव न्यायभाष्ये समुट्टङ्कितमादिवाक्येन—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्" इत्यालक्षणेन। "प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः । अविसंवादनम् ।" इति प्रमाणवार्त्तिके धर्मकीर्तिना प्रमाणसामान्यलक्षणं निरटङ्कि । विसंवादो वञ्चनं तद्योगाद् विसंवादि तद्भिन्नमविसंवादि ज्ञानं प्रमाणमित्युक्तं भवति । भ्रान्तं हि ज्ञानं यथावस्थितं वस्तु अन्यथा प्रदर्शयद् विसंवादयति प्रतिपत्तारम् । तथा च प्रवृत्तेरसामर्थ्यादिदं ज्ञानमयथार्थमिति व्यवसीयते । किं तावदविसंवादनमित्याकाङ्क्षायामाह—अर्थक्रियास्थितिरविसंवादनम् । अर्थक्रियास्थितिश्च न केवलं प्रवृत्तिसामर्थ्येन निवेद्यते, अपि तु प्रवृत्त्यभावेऽपि तद्योग्यार्थप्रदर्शनेनैव प्रामाण्यं निर्व्यूढं भवति । व्याख्यातं चैतद् धर्मोत्तरेण—"प्रदर्शितमर्थं प्रापयत् संवादकमुच्यते ज्ञानम् । पुरुषं प्रवर्तयज्ज्ञानं प्रमाणीभवति । प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव । तथा च यदि ज्ञानादर्थं परिच्छिद्यापि न प्रवर्तते पुरुषः, प्रवृत्तो वा कुतश्चित् प्रतिबन्धादर्थक्रियां नाधिगच्छति तदपि प्रमाणम्, प्रमाणयोग्यतालक्षणस्य अविसंवादस्यापरिहाणात् । तथा च प्रवृत्तिसामर्थ्यं वात्स्यायनप्रोक्तं सुस्थितं भवति । प्रवृत्तिसामर्थ्येन च तद्योग्यता विवक्षिता । अथ प्रवृत्त्यभावे अर्थक्रियाप्राप्तावसत्यां कथं प्रमाणयोग्यतावसाय इति चेदुच्यते, अभ्यस्तविषयेऽसत्यामपि प्रवृत्तौ विषयज्ञानं निरस्तविभ्रमाशङ्कमुपजायमानं स्वतः प्रमाणतया

अध्यवसीयते। एवमनुमानस्य साध्यव्याप्तहेतुदर्शनजन्यस्य स्वत एव प्रामाण्यं निश्चीयते। अर्थक्रियासंवादज्ञानञ्च स्वभावतः संशयविपर्ययशङ्कां व्युदस्यत् स्वत एव प्रमाणमिति निश्चीयते। अनभ्यासदशायां प्रवृत्तिसामर्थ्यज्ञानाधीनमेव प्रामाण्यज्ञानम्। प्रमाणस्य खलु व्यापारोऽर्थपरिच्छेदादेव समाप्यते। प्रवृत्तिस्तु अर्थित्वसामर्थ्यादिहेत्वन्तरापेक्षा बहिरङ्गैव तस्य प्रामाण्यपरिच्छित्तावानुकूल्यं सम्पादयति। "अत एव चानधिगतविषयं प्रमाणम्"। येनैव हि ज्ञानेन प्रथममधिगतोऽर्थः, तेनैव प्रवर्तितः पुरुषः, प्रापितश्चार्थः। तत्रैव चार्थे किमन्येन ज्ञानेनाधिकं कार्यम्? "अतोऽधिगतविषयमप्रमाणम्" इति धर्मोत्तरेणोक्तम्। एतच्च न तस्य स्वकपोलकल्पितं किन्तु प्रमाणवार्त्तिकवचनमनुरुध्यैव। "अज्ञातार्थप्रकाशो वा" इति प्रमाणलक्षणं वार्त्तिककारोक्तमनुरुन्धानेन प्रमाणलक्षणमनधिगतार्थविषयकमविसंवादकं ज्ञानं पर्यवसायितं धर्मोत्तरेण। यदि केवलमविसंवादनमेव प्रमाणलक्षणं भवेत्तदा निर्विकल्पकपृष्ठभाविनो विकल्पस्य शाब्दज्ञानस्य च प्रामाण्यमङ्गीकर्त्तव्यं स्यात्, तच्च नाङ्गीक्रियते। उक्तञ्च हेतुबिन्दौ—"यदाद्यमसाधारणविषयंदर्शनं तदेव प्रमाणम्" इति तत्पृष्ठभाविना विकल्पेन पूर्वप्रदर्शितस्यार्थस्यैव प्रकाशकेन न क्वाप्यर्थक्रिया सम्पाद्यते, अतः सविकल्पस्य सत्यपि प्रवृत्तिसामर्थ्ये ज्ञातस्यैव ज्ञापकत्वान्न प्रामाण्यम्।

अनुमानं तर्हि न प्रमाणं भवितुमर्हति, सविकल्पकरूपत्वात्। सत्यम्, सर्वमेव सामान्यं न काञ्चिदर्थक्रियां सम्पादयति, सामान्यस्यावस्तुत्वाद् विकल्पमात्रगोचरत्वादेव। यद्यपि सामान्यमनुमानविकल्पग्राह्यम्, तथापि—"तत् कारणव्यापकसम्बद्धलिङ्गनिश्चयद्वारायातं सम्बद्धसम्बन्धादनधिगतार्थक्रियासाधनविषयामर्थक्रियामुपकल्पयतीति तद्विषयो विकल्पः प्रमाणम्" (हे० बि० टी० सा० वि० २६)। अत एव यद्यपि साध्यं सामान्यमनर्थभूतं तथापि तस्मिन्नर्थाध्यवसायेन प्रवृत्तस्य पुरुषस्य स्वलक्षणप्राप्तिर्भवति, स्वलक्षणस्य हेतोः स्वलक्षणभूतकारणव्यापकाभ्यां सम्बद्धत्वादित्यनुमानमपि प्रमाणमाख्यायते। प्रत्यक्षस्यापि प्रामाण्यमर्थाव्यभिचारनिबन्धनमनुमानस्यापि प्रतिबद्धहेतुजन्यत्वादर्थाविनाभावित्वात् प्रत्यक्षवत्प्रामाण्यमप्रतिहतमेव। अत एव प्रत्यक्षमनुमानञ्चेति ग्रन्थकारोक्तः—"चकारो प्रत्यक्षानुमानयोस्तुल्यबलत्वं समुच्चिनोति। यथाऽर्थाविनाभावित्वादर्थं प्रापयत् प्रत्यक्षं प्रमाणम्, तद्वदर्थाविनाभावित्वादनुमानमपि परिच्छिन्नमर्थं प्रापयत् प्रमाणमिति" (न्या० बि० टी०

४०)। शाब्दं ज्ञानं तर्हि प्रमाणं भवतु, न, शब्दस्य स्ववाच्येनार्थेनाविनाभावाभावात्। विवक्षायामेव तस्य प्रामाण्यान्न शब्दस्यार्थतत्त्वनिबन्धनं प्रामाण्यं संभवति। किञ्च, गृहीतग्रहणादपि न शब्दस्य प्रामाण्यम्। एवं प्रत्यक्षानुमानोभयानुगतमविसंवादकमनधिगतार्थविषयकं ज्ञानं प्रमाणमिति सामान्यलक्षणं निर्व्यूढं भवति। एतेन या च आधुनिकव्याख्यातृभिः प्रत्यक्षानुमानोभयानुगतलक्षणानुपपत्तिरुद्भाविता सा प्रतिव्यूढा वेदितव्या। अथ कथं सविकल्पकं ज्ञानं न प्रमाणीभवेदिति प्रश्ने एतद् वक्तव्यम्—अभ्युपगतप्रमेयस्वभावमनुरुध्य प्रमाणलक्षणं दार्शनिकैरुद्भावितम्। बौद्धानां मते क्षणिकं निर्धर्मकं स्वलक्षणं व्यक्तिरूपं वस्तुसत् तत्त्वम्, सामान्यं विकल्पसिद्धमवस्तुसत्। अतस्तदवगाहि ज्ञानं न प्रमाणम्। अद्वैतवेदान्तिनां निर्धर्मकं ब्रह्मैव परमार्थसद्वस्तु। अत एव तद्ग्राहकं प्रत्यक्षं न सप्रकारकं भवितुमर्हति। नैयायिकानां तु गुणकर्मसामान्यविशेषादीनां वस्तुसतां द्रव्याविनाभूतानां प्रत्यक्षेण ग्रहणं भवत्येव; परन्तु विशिष्टज्ञाने विशेषणज्ञानं कारणमिति न्यायानुरोधेन प्रथमं विशेषणविशेष्ययोर्ज्ञाने सत्यपि तदनन्तरभाविविशिष्टज्ञानं सविकल्पकात्मकं विशेषणविशेष्यसम्बन्धावगाहिरूपं जायते। उभयमप्यविशेषेण प्रमाणम्, विशेषणस्य विशेष्यस्य तत्सम्बन्धस्य च वस्तुतो विद्यमानस्य सविकल्पकेन व्यवसायात्मकेन गृहीतत्वात्। मीमांसकस्यार्हतस्य च सामान्यविशेषात्मकं वस्तु। अस्माद्धेतोः प्रत्यक्षमुपजायमानमुभयग्राहकमुपजायते। यद्यपि प्रथमं बालमूकादिज्ञानसदृशमालोचनात्मकं ज्ञानमुत्पद्यत इति भट्टस्य मतम्, तथापि न तेन ज्ञानेन व्यवहारः सिद्ध्यति, किन्तु जात्यादिविशिष्टतया व्याक्रियमाणेन। प्राभाकरा रामानुजीया माध्वाश्च प्रथमत एव सप्रकारकं ज्ञानमुत्पद्यमानमभ्युपगच्छन्ति। सामान्यादीनां विशेष्येण सहैव एकेन्द्रियग्राह्याणां सतामपि कथं न प्राथमिकेनैव प्रत्यक्षज्ञानेन ग्रहणं स्यात्, योग्यताया अविशेषात्। यस्तु विशेषणज्ञानं विशिष्टज्ञानं प्रति कारणमिति नैयायिकानामभ्युपगमः, स तु भिन्नेन्द्रियग्राह्ये विशेषण एव संगच्छते। तस्मात् सविकल्पकमेव प्रत्यक्षं प्रथमत एवोत्पद्यत इति प्राभाकराणां सिद्धान्तः। वस्तुतस्तु यस्य खलु यादृशं प्रमेयस्वरूपं तदनुरुध्यैव प्रमाणस्य लक्षणं तत्तत्सम्प्रदायविद्भिः प्रवर्तितम्। सौत्रान्तिकानां मते सर्वं वस्तु स्वलक्षणम्, न तु तत्र किमपि सामान्यं संभवतीति तन्मते निर्विकल्पकमेव प्रत्यक्षं वस्तुग्राहि न त्वन्यत्।

कार्यं स्वभावोऽनुपलम्भश्चेति हेतुत्रयमङ्गीकृतं दिङ्नागाचार्येण तदनुवर्तिना धर्मकीर्तिना च। तत्राद्यौ द्वौ वस्तुसाधनौ, तृतीयस्तु प्रतिषेधहेतुः। कार्यस्य कारणाव्यभिचारित्वात् स्वभावस्य च साध्यायत्तत्वात् तयोरविनाभावः सिद्धः। "कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमोऽदर्शनान्न न दर्शनात्॥" (प्र० वा० ३५, २६८) इत्यविनाभावनिबन्धनद्वयं तदुत्पत्तितादात्म्यरूपं प्रोक्तम्।

अतः कार्यकारणभावस्तादात्म्यं चेति द्वयमेवाविनाभावनिबन्धनमन्यद्वेति विचारो नात्र प्रस्तूयते, बहु वक्तव्यत्वात्। एतद्द्वयमेवाविनाभावाङ्गं भवतु, साध्याविनाभावी च हेतुः साध्यसिद्धौ समर्थो नान्यः। एवं सति कार्यं स्वभावश्चेति हेतुद्वयमेव साध्याविनाभावि सिध्यति। अनुपलब्धिस्तु कथं साध्यसिद्धेरङ्गं भवेत्, अविनाभावस्य तन्निबन्धनस्यादर्शनात्। तथा सति कार्यं स्वभावोऽनुपलम्भश्चेति हेतुत्रितयोक्तिरपि कथं संगच्छताम्, इति चेत्, उच्यते—अनुपलब्धेः स्वभावहेतावन्तर्भावाद् द्वयस्यैवाविनाभावनिबन्धनस्योक्तौ नानुपलब्धेरगमकत्वमाशङ्कनीयम्। हेतुत्रितयोक्तिस्तु साध्यस्वरूपभेदमादाय प्रवृत्ता। कार्यस्वभावौ विधिसाधनौ, कार्यस्य गमकत्वे बीजं कारणाविनाभावित्वम्। स्वभावस्य च साध्यस्वभावत्वमेव। अनुपलब्धिस्तु प्रतिषेधहेतुरेव। तथा च विधिप्रतिषेधात्मकं साध्यभेदद्वयमादायानुमानस्य द्वैविध्यं प्राप्तं सत् पुनर्विधिसाधनस्य कार्यकारणभावस्वभावरूपनियामकभेदादवान्तरभेदद्वयेन सम्भूय त्रयो हेतवः प्राप्ताः, द्वौ विधिसाधनौ कार्यस्वभावरूपौ, प्रतिषेधहेतुश्चानुपलब्धिरिति हेतुत्रितयोक्तेः साध्यस्वरूपभेदमूलकत्वात्, अविनाभावमूलकत्वाभावात्। अविनाभावनिबन्धनञ्च द्वयमेवेति न काचिदनुपपत्तिः। अत्र द्वावेव वस्तुसाधनावित्यवधारणं न तु वस्तुसाधनावेवेति, सामर्थ्याद् व्यवच्छेदस्यापि सिद्धेः। वस्तुतस्तु उपलब्धिलक्षणप्राप्तिरुपलभ्यवस्तुस्वभाव इति तद्भावोऽपि सामर्थ्यात् स्वभावभूत एव। एवं कार्यकारणभावेऽपि कारणाभावात् कार्याभावानुमाने कार्याभावाद्वा अप्रतिबद्धसामर्थ्यकारणाभावानुमाने कार्यकारणभाव एव व्याप्तिनिबन्धनम्। एवमभावे साध्ये न तदतिरिक्तव्याप्तिनियामकापेक्षा। अस्मिन् प्रसङ्गे स्वभावहेतावाक्षेपः कृतो नैयायिकादिभिः। तत्र किञ्चिद् वक्तव्यमवशिष्यते। स्वभावहेतौ साध्यसाधनयोरभेदात् कथं शिंशपात्वेन वृक्षानुमानम्, नह्यभिन्नेषु प्रतिबन्धः संभवति। न च शिंशपा वृक्षात्मिका, खदिरादिभ्यो व्यावर्तमानत्वात्। तदात्मत्वे प्रत्युत लिङ्गग्रहणेनैव

साध्यस्य ज्ञानमव्यतिरेकात् सिध्येत्। अतो न स्वभावो हेतुः। अत्रोच्यते—शिंशपा हि वृक्षविशेषस्वभावः, वृक्षविशेषोऽपि शिंशपास्वभावः। अतस्तदुभयगतं तादात्म्यं वर्तत एव। सत्यपि तादात्म्ये यदि मोहात् कश्चित् शिंशपात्वमवगच्छन्नपि वृक्षात्मकत्वमस्य नाध्यवस्यति तं प्रति तदनुमानं प्रयुज्यते मोहव्यावर्तनार्थमेव। न वृक्षत्वस्य शिंशपां प्रति गमकत्वं यतः शिंशपा न वृक्षमात्रस्वभावा। सर्वञ्च गणितशास्त्रे रेखागणितशास्त्रे चानुमानं स्वभावहेतुतामाश्रित्यैव प्रवर्तमानं दृश्यते। किञ्च, गुणत्वेन द्रव्यत्वे साध्ये स्वभावहेतुकमेवानुमानं पुरस्करणीयम्।

अधुनाऽनुपलब्धिलिङ्गेनाभावसाधने कुमारिलभट्टेन बहूनां दोषाणां प्रसञ्जने कृते प्रत्युच्यते—यदभावो नानुमीयते, किन्तु दृश्यानुपलम्भेनाभावव्यवहार एव साध्यते। अनुपलब्धिलिङ्गेनाभावे साध्येऽनुपलब्धेरप्युपलब्ध्यभावत्वाद् उपलब्ध्यन्तराभावरूपेणानुपलम्भान्तरेण तस्याः सिद्धिः संभाव्यते। तथा च तस्य तस्यानुपलम्भस्योपलब्ध्यभावेन साध्यत्वेऽनवस्था दुष्परिहरा स्यात्। अथोपलम्भाभावो नान्येन सिध्यति, केवलं यदि स्वसन्ताने ज्ञानं स्यादुपलभ्येत, अनुपलम्भादसदेव तदिति स्वत एवोपलम्भाभावः सिद्ध इष्यते, तदा स इवाऽभावोऽपि सिद्धः स्यादिति नानुपलब्ध्याऽभावसिद्धिः सम्पाद्या। यद्यन्यस्य घटविविक्तभूतलस्योपलब्ध्या घटानुपलब्धिसिद्धिरिति मतं तदा प्रत्यक्षसिद्धैव घटानुपलब्धिः। तथा च घटभूतलयोरेकज्ञानवेद्ययोर्यदा भूतलमात्रग्राहकं ज्ञानं भवति तदा स्वस्य घटग्राहकत्वाभावं निश्चाययद् घटानुपलब्धिरूपमेवानुभूयते। घटानुपलब्धिश्च घटाभावोपलब्धिः। एवं सति घटाभावसिद्ध्यर्थं नानुपलब्ध्याख्यं प्रमाणान्तरं न वानुपलब्धिलिङ्गकमनुमानमपेक्षणीयम्, तस्य प्रत्यक्षसिद्धत्वात्। प्रत्यक्षेण दृश्यस्य भावानिश्चय एवाभावनिश्चयः। तथा च यथोपलब्ध्यभावः प्रत्यक्षसिद्धः, एवमर्थाभावोऽपि प्रत्यक्षसिद्ध एव। अनुपलब्धिलिङ्गेन किं तावत्साध्यमिति चेदुच्यते, अभावव्यवहार एव तत्साध्यः, अतो नानर्थक्यम्। यद्यप्युपलम्भयोग्यानां पदार्थानामनुपलब्धिरेव तेषामसत्ता नान्या, एवं सिद्धेऽपि प्रत्यक्षेणाभावव्यवहारस्य विषये मोहात् तदभावमप्रतिपद्यमानः पुरुषो दृश्यानुपलब्धिलिङ्गेनाभावप्रदर्शनेन तद्व्यवहारे प्रवर्त्यते। व्यवहारश्च ज्ञानमभिधानं हानोपादानरूपा च निःशङ्का प्रवृत्तिः। अथ यदि दृश्योऽपि घटादिरत्र स्यादवश्यमुपलभ्येत, तत्संसर्गिभूतलोपलम्भेन तत्प्रत्यक्षकारणसाकल्येऽवसिते तदुपलम्भस्य

तत्सत्त्वेऽनिवार्यत्वात्। उपलम्भाभावे च तदभावः सिध्यन् कथं संशयविपर्ययोर्विषयः स्यात्? उच्यते, यथा कश्चन मूढमतिः शाबलेये गोव्यवहारं पश्यन् बाहुलेये गवि शाबलेयरूपाभावाद् गोव्यवहारे संशयानः सास्नादिमत्त्वमेव गोव्यवहारनिमित्तमिति विज्ञापितस्तद्व्यवहारे प्रवर्त्यते, एवमिहाप्यभावव्यवहारे दृश्यानुपलम्भस्य प्रयोजकत्वमङ्गीकर्तव्यम्। यदि दृश्यः स्यादुपलभ्येतेति तर्कानुगृहीतं प्रत्यक्षं दृश्याभावसाधकं मन्यन्ते नैयायिकाः। धर्मकीर्तिव्याख्यातमनुपलब्धिलिङ्गं तन्मतान्नातीव विशिष्यते।

अथ हेतुस्वरूपमधिकृत्य किञ्चिदुच्यते—"तत्र स्वार्थं त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानं तदनुमानम्" (न्या० बि० २।२)। "त्रिरूपलिङ्गाख्यानं परार्थमनुमानम्" (न्या० बि० ३।१)। त्रैरूप्यञ्च लिङ्गस्य साध्यधर्मिणि सत्त्वमेव, सपक्ष एव सत्त्वम्, असपक्षे चासत्त्वमेव निश्चितम्। अयमत्र निष्कर्षः—यः खलु हेतुः साध्यप्रतिबद्धः साध्याभाववदवृत्तिश्च स एव साध्यधर्मिणि साध्यमनुमापयेत्। अयमेव पक्षः—"पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः। अविनाभावनियमात्" इति दिङ्नागाचार्येण प्रतिपादितो धर्मकीर्तिना च प्रमाणवार्त्तिके विरोधिभिरापादितदूषणानां निराकरणेन व्युत्पादितः। पक्षधर्मवचनेन हेतोः साध्यधर्मिणि सत्त्वम्, तदंशस्तद्धर्मः साध्यस्तेन व्याप्त इति कथनेन सपक्षसत्त्वं विपक्षव्यावृत्तत्वञ्च प्रवेदितम्।

नैयायिकैरङ्गीकृतमसत्प्रतिपक्षितत्वमबाधितत्वं चेत्यधिकं रूपद्वयं प्रत्याख्यातम्, प्रथमस्यासंभवाद् द्वितीयस्य हेतुधर्मत्वानङ्गीकारात्। पक्षे साध्याभाव एव बाधः, स च न हेतुदोषः। सत्प्रतिपक्षरूपविरुद्धाव्यभिचारो नाम हेत्वाभासो न संभवीति धर्मकीर्तेर्मतम्। स च—"विरुद्धश्चासौ साधनान्तरसिद्धस्य धर्मस्य विरुद्धसाधनात्। अव्यभिचारी च स्वसाध्याव्यभिचाराद्विरुद्धाव्यभिचारी" (न्या. बि. टी. ३।११०) इति धर्मोत्तरेणेत्थं व्याख्यातः—प्रमाणसिद्धे हि त्रैरूप्ये स एव हेत्वाभासः संभवति यस्य प्रमाणासिद्धं रूपम्। न च विरुद्धाव्यभिचारिणः संभवोऽस्ति। नहि कार्यं कारणमवधीर्य स्वभावो वा साध्यव्याप्तत्वं विहाय संभवति। अनुपलम्भस्यापि यथोक्तलक्षणस्य वस्त्वभावाव्यभिचारित्वान्न विरुद्धत्वसंभवः। न चान्योऽव्यभिचारी, केवलं भ्रान्त्या "अवस्तुदर्शनबलप्रवृत्तमागमाश्रयमनुमानमाश्रित्य तदर्थविचारेषु विरुद्धाव्यभिचारी साधनदोष उक्तः" (न्या० बि०

३. २२४)। तत्र पक्षे हेतोरसत्त्वेऽसिद्धिः, सपक्षे चासत्त्वे विरुद्धत्वम्, विपक्षे सत्त्वे च अनैकान्तिकत्वमिति त्रयो हेतुदोषाः प्रसज्यन्ते। यः खलु हेतुत्वेनाभिमतः पक्षेऽसन् सोऽसिद्धः, सपक्षविपक्षोभयवृत्तिः साधारणानैकान्तिकः, विपक्षमात्रवृत्तिर्हेतुश्च विरुद्ध इति पर्यवसन्नम्। एतत्त्रयहेतुदोषव्युदासार्थं लिङ्गत्रैरूप्यकथनम्। उक्तञ्च—"हेतोस्त्रिष्वपि रूपेषु निश्चयस्तेन वर्णितः। असिद्धविपरीतार्थव्यभिचारिविपक्षतः॥" (प्र० वा० ३. १४)। अत्र पक्षसत्त्वमित्यत्र पक्षशब्दः साध्यधर्मिपरः, यत्र साध्यो धर्मो न सिद्धः किन्तु सिषाधयिषितः। निश्चितसाध्यधर्मवान् सपक्षः, निश्चितसाध्याभाववान् विपक्ष इति निष्कर्षः, एतल्लक्षणस्यैव हेतोः साध्यव्याप्तिसंभवात्। साध्यव्याप्तिश्च यत्र हेतुस्तत्र साध्यं यत्र न साध्यं तत्र न हेतुरित्यन्वयव्यतिरेकाभ्यामेवावसीयते। अत्र च हेतुसाध्यशब्दौ सामान्यपरौ हेतुत्वावच्छिन्नसाध्यत्वावच्छिन्नरूपौ। अस्याश्च व्याप्तेः सूक्ष्मेक्षिकया नव्यन्याये सप्रपञ्चः परिष्कारः कृतः। स च तत्र कृतपरिचयानामतिविदितः। उदयनाचार्येणात्मतत्त्वविवेके (पृ० ८६३) व्याप्त्यपरपर्यायः प्रतिबन्धः स्वाभाविकः सम्बन्ध इत्युक्तम्। धर्मकीर्तिनाऽपि स्वभावप्रतिबद्धत्वे ह्यर्थोऽर्थान्तरं गमयेदिति ब्रुवता प्रतिबन्धस्य स्वाभाविकसम्बन्धत्वमङ्गीकृतमेव। स्वाभाविकः सम्बन्ध इत्यत्र स्वाभाविको निरुपाधिक इत्यर्थः। उपाधिश्च साध्यप्रयोजकं निमित्तान्तरम्। तस्योपाधेश्च लक्षणम्—"साधनाव्यापकत्वे सति साध्यव्यापकत्वम्", विपक्षे बाधकाभावादुपाधेर्ज्ञानम्, विपक्षे बाधकाच्चानुपाधिकत्वज्ञानं संभवति। विपक्षबाधकश्च तर्कः सहचारदर्शनेन व्याप्तिज्ञाने सति तत्र व्यभिचारशङ्काव्युदासेन प्रमाणमनुगृह्णाति। व्यभिचारव्युदासश्च यत्र स्वतः सिद्धस्तत्र न तर्कापेक्षा। अतस्तर्कस्यापि व्याप्तिमूलकत्वेन तदर्थं तर्कान्तरानुसरणेनानवस्थाप्रसङ्गस्य दुर्निवारत्वमापादितं खण्डनकृता। उदयनाचार्येण न्यायकुसुमाञ्जलौ—"व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः" इति ब्रुवता शङ्काशमनार्थं तर्कानुसरणं सति स्वक्रियाव्याघाते निवर्तत इति प्रख्यापितम्। व्याघातोऽपि तर्क इति श्रीहर्षस्य प्रत्यवस्थानं विदितवेद्यानां सुप्रतीतमेवेति कृतं प्रसक्तानुप्रसक्त्या।

अथेदानीं पात्रस्वामिनाम्ना केनापि जैनतार्किकेण हेतोस्त्रैरूप्यमधिकृत्य महानाक्षेपः कृतः। तन्मतमेवान्तर्व्याप्तिवादस्य निबन्धनमभूत्। उक्तञ्च तेन—"अन्यथानुपपन्नत्वं यस्य तस्यैव हेतुता। दृष्टान्तौ द्वावपि स्तां वा मा वा तौ हि न कारणम्॥

अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्। नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्॥ (त० सं० पृ० ४०६) इति। अस्य खल्वाशय एवं निरूप्यते—यदि हेतोः साध्यव्याप्तिर्दृष्टान्त एव गृह्येत तदा साध्यधर्मिणि हेतोः साध्यव्याप्त्यग्रहणादनुमानमेव न संभवेत्। सर्वोपसंहारेण व्याप्तिग्रहणेऽपि नानुमानस्य प्रामाण्यम्, व्याप्तिग्राहकप्रमाणाधिगतविषयत्वेन ज्ञातज्ञापकत्वात् स्मृतिवत्। यच्च पक्षे सत्त्वमेवेति हेतुरूपमुक्तम्, तदपि न सम्यक्, साध्यव्याप्तस्यैव हेतोः पक्षधर्मत्वे गमकत्वं न तु सत्तामात्रेण। सपक्षसत्त्वमपि न हेतुरूपम्, तन्मात्रस्य व्याप्तिनिबन्धनत्वाभावात्। एवं विपक्षासत्त्वमपि तथैव। नहि विपक्षेऽदर्शनमात्रेण हेतुः सर्वसाध्याभावाधिकरणावृत्तिर्निश्चेतुं शक्यः। यावत्पर्यन्तं हेतोः साध्याभाववद्वृत्तित्वं तर्काख्येन प्रमाणेन बाधितं न भवेत् तावत् सहस्रकृत्वोऽप्यन्वयसहचारदर्शनेन व्यतिरेकसहचारदर्शनेन च न हेतुसाध्ययोः प्रतिबन्धः शक्यनिश्चयो भवेत्। तस्मादन्यथानुपपन्नत्वमेवैकं हेतुलक्षणं युक्तम्। उक्तञ्च पुनस्तेन—"विना साध्याददृष्टस्य दृष्टान्ते हेतुतेष्यते। परैर्यथा पुनर्धर्मिण्यसंभूष्णोर्विनाऽमुना॥ अर्थापत्तेश्च शाबर्या मैक्षवाक्षानुमानतः। अन्यदेवानुमानं नो नरसिंहवदिष्यते॥" (त० सं० पृ० ४०६) इति। अपि च यद्यनुपलम्भस्य साध्यप्रतिबन्धो नास्ति तदाऽप्रतिबद्धोऽपि हेतुर्गमकत्वेनाभिमत इति त्रिधैव स इति यदुक्तं दिङ्नागेन तदसङ्गतं स्यात्। अथ प्रतिबन्धोऽस्ति, तदा कार्यस्वभावयोरेवान्तर्भावात् त्रिधैव स हेतुरिति नियमो न युज्यते, अनुपलम्भस्य कार्यस्वभावयोरेकतरस्मिन्नन्तर्भावे हेतोर्द्विप्रकारत्वादिति।

अत्र प्रतिविधीयते—इदमन्यथानुपपत्तिलक्षणं किं सामान्येन गम्यतेऽथवा पक्षेऽथवा दृष्टान्त इति विचारणीयम्। यदि सामान्येनैव साध्येन हेतोरविनाभावित्वं निश्चितम्, न तेन साध्यधर्मिणि विवक्षितस्य साध्यस्य सिद्धिः स्यात्। तथा हि—चाक्षुषत्वस्य हेतोरनित्यत्वेन साध्येनाविनाभावित्वं सामान्येनावसितमपि न तेन शब्दरूपे धर्मिण्यनित्यत्वस्य सिद्धिः संभवति, चाक्षुषत्वस्य शब्दरूपे साध्यधर्मिणि असत्त्वात्। अथ चाक्षुषत्वस्य न शब्दगतानित्यत्वेनाविनाभाव इति न तत्र चाक्षुषत्वहेतुना साध्यानुमानमित्युच्येत, तदपि न साधु, चाक्षुषत्वस्यानित्यत्वस्य च धर्मिविशेषमनपेक्ष्यैव व्याप्तिनिश्चयात्। शब्दोऽनित्यश्चाक्षुषत्वादित्यनुमाने नहि चाक्षुषत्वं व्याप्यत्वासिद्धम्, किन्तु स्वरूपासिद्धमेव। तयोर्व्याप्तौ स्थितायामपि यदि न तस्य

साध्यगमकत्वं शब्दरूपे धर्मिणि तदा हेतोः पक्षधर्मत्वमवश्यमनुमितेरङ्गं वक्तव्यम्। किञ्च साध्यसाधनयोर्व्याप्तिः सर्वोपसंहारेण गृहीताऽपीह साध्यधर्मिणि इदानीं साध्यधर्म इति देशकालविशेषावच्छेदेन निश्चयमाधातुं न प्रभवति। नहि व्याप्तिग्रहणवेलायां सर्वेषामेव धर्मिणां शृङ्गग्राहिकया ज्ञानं समस्तीति कस्यापि सम्मतम्। तथात्वे व्याप्तिग्राहकमानेनैव साध्यसिद्धावनुमानमप्रयोजनं स्यात्। अथ पक्षधर्मताऽपि हेतोरनुमानाङ्गमास्थीयते तदा त्रैरूप्यमेव फलत आयातं भवन्मतेऽपि, पक्षधर्मत्वस्याङ्गीकारात्। अन्यथानुपपत्त्या साध्याभावाधिकरणवृत्तिहेत्वभावरूपया व्यतिरेको विपक्षासत्त्वलक्षणोऽङ्गीकृत एव। व्यतिरेकस्य चान्वयसापेक्षत्वादनिच्छतापि हेतोः सपक्षसत्त्वमप्यङ्गीकर्त्तव्यमेव। तथा च—"अन्यथाऽनुपपत्त्या हि व्यतिरेकान्वयौ गतौ। तस्य धर्मिणि सद्भावात् पक्षधर्मत्वसंश्रयः॥" (त० सं० पृ० ४०८) इति त्रैरूप्यमेवान्यथानुपपत्त्या ख्यापितं भवति। केवलं शब्दलाघवमेव सम्पादितं न त्वर्थलाघवमपि।

यच्चोक्तं दृष्टान्ताद्यनपेक्षितया साध्यधर्मिण्येवाविनाभावो गृह्यते। तस्मान्मीमांसकाभिमतार्थापत्तितो बौद्धसम्मतादनुमानाच्च नरसिंहवदार्हतानामनुमानमिति तदप्यपहस्तितमेव। साध्यधर्मिणि व्याप्तिग्राहकमानेन साध्यसिद्धौ हेतोर्नैरर्थक्याद् गतमनुमानेन। अथ दृष्टान्तधर्मिण्यविनाभावप्रतिपत्तिरिष्येत तदा साध्यधर्मिणि न साध्यस्य निश्चयो हेतुना शक्यक्रियः। अथ सर्वोपसंहारेण व्याप्तिर्निश्चीयत इत्यभिप्रायस्तदा शृङ्गग्राहिकया धर्मिविशेषाननुल्लिख्यैव व्याप्तिज्ञानं जायत इति सर्वसम्प्रतिपन्नः पक्षोऽभ्युपगतो भवति। तत्र च केवलस्य व्याप्तिज्ञानस्य साध्यसिद्ध्यनङ्गत्वमनुपदमेव प्रदर्शितम्। तस्मादन्यथानुपपत्तिरूपैकलक्षणो हेतुरित्युक्तिः केवलमुत्तानदृष्टीनां चेतसि चमत्काराय कल्पते। अन्यथानुपपत्तिश्च व्याप्तेरेव नामान्तरम्। केवलञ्च व्याप्तिज्ञानं पक्षधर्मत्वमन्तरेण न साध्यस्य गमकमिति च चाक्षुषत्वहेतोरनित्यतान्यथानुपपन्नस्यापि शब्दरूपे धर्मिणि साध्यागमकत्वं दृष्टमेव। एवं सति—"तेनैकलक्षणो हेतुः प्राधान्याद् गमकोऽस्तु नः। पक्षधर्मादिभिस्त्वन्यैः किं व्यर्थैः परिकल्पितैः॥" (त० सं० ४०७) इति यदुक्तं तत्केवलं शब्दाडम्बरमात्रमिति स्वरूपाविष्करणमेव तन्निराकरणमिति न तत्र प्रयत्नान्तरमपेक्ष्यते। यदपि च शब्दलाघवं कृतं तदपि व्यतिरेकव्याप्तौ न दृष्टान्तापेक्षेति—"तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः। ख्याप्येते

विदुषां वाच्यो हेतुरेव हि केवलः ।।" (प्र० वा० ३-२६) इति धर्मकीर्तिनैवोक्तम् । मनोरथेन च—ये तु प्रतिबन्धं विदन्ति तेषां विदुषां हेतुरेव केवलो वाच्यो न दृष्टान्तः, तत्र दर्शनीयस्य प्रतिबन्धस्य सिद्धत्वादिति धर्मकीर्तिमतमेव भाषान्तरेण स्वोपज्ञतया ख्यापितम् । अन्यथानुपपत्तिश्च प्रतिबन्धः स्वाभाविकः सम्बन्ध इति धर्मकीर्तेरेवानुवादः कृतो न किञ्चनात्रापूर्वं वस्तु ।

यदपि च तेनोक्तम्—"अन्यथानुपपत्त्यैव शब्ददीपादिवस्तुषु । अपक्षधर्मभावेऽपि दृष्टा ज्ञापकताऽपि च ।।" (त० सं० ४०७) इति, तदपि न क्षोदक्षमम् । शब्दस्य न बाह्यार्थापेक्षयाऽन्यथानुपपन्नत्वं सिद्धमित्यलिङ्गत्वमेव । उक्तञ्च धर्मकीर्तिना—" वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते । प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ।।" (प्र० वा० वृ० ४) इति । विवक्षायामेव शब्दस्य गमकत्वं लिङ्गविधया, तत्र च त्रैरूप्यमस्त्येव । यच्च दीपनिदर्शनमन्यथानुपपत्तावुपन्यस्तं तदप्यसमीक्षिताभिधानमेव । प्रदीपो न लिङ्गत्वेन साध्यगमकः, किन्तु समुत्पन्ने घटे विज्ञानजनकत्वेनेति तस्यालिङ्गभूतस्य पक्षधर्मत्वादिचिन्ताऽप्रसक्तैव ।

नन्वेवमनुमानस्य प्रामाण्ये स्थितेऽपि न पक्षधर्मत्वं सर्वत्रानुमानाङ्गमित्यभ्युपगमनीयम्, अपक्षधर्मस्यापि गमकत्वदर्शनात् । तथा हि—अधो देशे दृष्टो नदीपूर उपरिष्टाद् वृत्तां वृष्टिं गमयति । किञ्च, मातापित्रोर्ब्राह्मणत्वेन पुत्रस्य ब्राह्मणत्वमनुमीयमानं न पक्षधर्ममपेक्षते । यदि क्लेशेनात्र पक्षधर्मत्वं प्रकल्प्येत तन्नाञ्जस्यमृच्छेत् । मातापित्रोश्च ब्राह्मणत्वं व्यधिकरणमेव पुत्रस्य ब्राह्मणत्वं गमयति ।

अत्रोच्यते, यदि पक्षधर्मतामनपेक्ष्यैव नदीपूरो वृष्टिं गमयेत् तर्हि कथमुपरिष्टादेव तद् गमयति नान्यत्र, पूरस्य तत्सम्बन्धित्वादिति चेत्तर्हि यतोऽयं नदीपूर आयातस्तत्रैव वृष्टेरनुमानं न त्वन्यत्र मरुदेशादौ, नदीपूरस्यातत्सम्बन्धित्वात् । तथा च नदीपूरस्योपरिदेशसम्बन्धित्वेनैव गमकत्वात् पक्षधर्मत्वं स्पष्टमेव, न तु क्लेशकल्पनीयम् । शिशोर्ब्राह्मणत्वानुमाने शिशुसम्बन्धिनोरेव मातापित्रोर्ब्राह्मणत्वं गमकं न त्वतत्सम्बन्धिमातापित्रोर्ब्राह्मण्यम् । अतोऽत्रापि पक्षधर्मस्यैव हेतोर्गमकत्वम् । वस्तुतस्तु हेतोर्व्यधिकरणत्वे साध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत् साध्यधर्मिणि, यथा चाक्षुषत्वस्य शब्दानित्यत्वे साध्ये । अतश्च ब्राह्मणभूतमातापितृजन्यत्वं शिशोर्ब्राह्मण्यानुमाने हेतुरिति कथमपक्षधर्मस्य गमकत्वं शक्योत्प्रेक्षम् । यदपि

चोक्तम्—चन्द्रोदयात् कुमुदविकाशस्य जलधिवृद्धेश्चानुमानम्, हेतुसाध्ययोर्वैयधिकरण्येऽप्यातपस्य दृष्ट्या पर्वतस्यापरभागे छायानुमितिः, कृत्तिकोदयाद् रोहिण्युदयस्यासन्नत्वमनुमीयते। अतो न सर्वस्य हेतोः कार्यस्वभावानुपलब्धिरूपत्वमेव, तद्व्यतिरिक्तस्यापि गमकत्वदर्शनादिति।

तत्र प्रतिसमाधीयते। न चैतेष्वनुमानेषु हेतोरपक्षधर्मत्वम्। तथा हि—चन्द्रोदयात् कुमुदविकाशस्य जलधिवृद्धेश्चानुमितौ चन्द्रोदयो हेतुः, स च नापक्षधर्म एव गमकः, यस्मिन्नेव काले चन्द्रोदयस्तस्मिन्नेव काले कुमुदविकाशादेः संभवात्। तथा च काल एवात्र धर्मी तस्मिन्नेव साध्यसाधनयोः सामानाधिकरण्यम्। न च कालरूपः पदार्थो वस्तुभूतो बौद्धानामसम्प्रतिपन्नः, तथा च वन्ध्यापुत्रः शूरः समरविजयित्वादित्यनुमानवदाश्रयासिद्धता हेतोरिति कथमनुमानमिति वाच्यम्, यद्यपि कालो नाम स्वतन्त्रः पदार्थो बौद्धानामसम्प्रतिपन्नस्तथापि पूर्वाह्णादिप्रत्ययविषयस्य महाभूतविकारस्य काल इत्यभिधेयस्याभ्युपगमान्नाश्रयासिद्धता हेतोरापादनीया।

अथ भवतु पक्षधर्मत्वं हेतूनाम्, कार्यस्वभावादिष्वनन्तर्भावात्, तदतिरिक्तहेत्वङ्गीकारस्तु बौद्धस्य दुर्निवार इति चेदुच्यते—कुमुदविकाशादिषु कार्यकारणभावस्यैव प्रतिबन्धरूपत्वं बोद्धव्यम्। तथा हि—यदेव कारणं चन्द्रोदयादीनां तदेव तत्समानकालोत्पन्नेषु कुमुदबोधादिषु सहकारिकारणतां प्रतिपद्यत इति चन्द्रोदयादयः स्वकारणमनुमापयन्तस्तद्धेतुकसमानकालभाविन्यपि कुमुदबोधादीन्यनुमापयन्तीति निश्चेतव्यम्। अन्यथा प्रतिबन्धाभावादेव न गम्यगमकभावो भवेत्। प्रतिबन्धनिबन्धनं च कार्यकारणभावः स्वभावश्चेति पूर्वमेव परीक्षितम्। यत्तु कृत्तिकोदयादनन्तरभाविरोहिण्युदयानुमानं तत्रापि कृत्तिकोदयकारणस्य सन्तत्या रोहिण्युदयहेतुत्वमवसातव्यम्। एतच्च—"एकसामग्र्यधीनस्य रूपादेरसतो गतिः। हेतुधर्मानुमानेन धूमेन्धनविकारवत्॥" (प्र० वा० पृ० २८८) इति धर्मकीर्तिनैव कार्यस्य कारणानुमानद्वारेण तत्समानकालिकतत्समनियतस्य सहकारिकारणादेरप्यनुमानेन तत्कार्यस्य तस्यानुमानं कार्यकारणभावमूलकमेव। यथा धूमादग्न्यनुमानेन तत्कार्यस्येन्धनविकारस्याप्यनुमानं भवतीति दर्शितम्। यैव रसस्य सामग्री सैव रूपादीनामपीत्येकसामग्र्यधीनस्य रूपादे रसादनुमानं कारणानुमानप्रणालिकया जायमानं कार्यकारणभावमूलकमेव।

अयमत्र निष्कषः—कार्यस्वभावानुपलब्धिरूपं हेतुत्रितयमेव बौद्धैः साध्यगमकमिष्यते, त्रयाणामेव हेतूनामविनाभावसंभवात्। अविनाभावश्च कार्यस्वभावाभ्यां व्याप्तः। तत्र विधौ साध्ये कार्यं स्वभावश्च हेतू, प्रतिषेधे साध्येऽनुपलब्धिरेव। अतस्त्रिविध एव हेतुर्भवति। कार्यादेरज्ञाताविनाभावस्याहेतुत्वम्। कारणव्यापकानुपलब्ध्योरप्यविनाभावेनैव गमकत्वम्। यस्मादेवाविनाभावात् कार्यं कारणं व्याप्यं च व्यापकं गमयति, तस्मादेव कारणानुपलब्धिर्व्यापकानुपलब्धिश्च कार्याभावं व्याप्याभावञ्च गमयतः, अभावानुमाने तत्प्रतियोगिभूतभावानुमाननिबन्धनस्याविनाभावस्य प्रयोजकत्वात्। यदा घटादेरुपलम्भजननयोग्यः स्वभाव उपलब्धिरुच्यते हेतुसाकल्ये सत्युपलम्भाव्यभिचारात्। उपलब्धिश्च सत्ता, तदा अनयोस्तादात्म्यम्। तेन स्वभावानुपलब्ध्या दृश्यघटादेरभावव्यवहारे साध्ये एष एव तादात्म्यरूपाविनाभावनियमः प्रयोजको भवति। न चानुपलब्धेः कार्यहेतावन्तर्भावः, तादात्म्यातिरिक्तप्रतिबन्धानपेक्षणात्। हेतोश्च साध्यप्रतीतिः साध्यायत्ततायां सत्यामुपपद्यते। न च तदायत्तस्वभावत्वं कार्यादित्रितयातिरिक्ते संभवतीति बौद्धानां सिद्धान्तः। अत्र च नैयायिकादीनां विप्रतिपत्तिरतिमहती दृश्यते। विस्तरभिया मतिमान्द्याच्च तत्परीक्षातो विरम्यते। यच्चात्र किञ्चिदुक्तं तन्मूलग्रन्थेभ्यः समाहृत्य प्रायशस्तत्रत्यानामेव वचनानामनुवादेन। न किञ्चिदत्रापूर्वमुद्भावितम्, शक्त्यभावात्।

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचोविन्यासवैचित्र्यमपि नात्रोपपद्यते॥
संग्रहाद् विप्रकीर्णानामुक्तस्यैवोपपादनात्।
अनुक्तस्यानुपन्यासात् सन्तोषो विदुषां कथम्॥
यद्वा निर्गुणमप्यर्थमभिनन्दन्ति साधवः।
प्रणयिप्रार्थनाभङ्गसंविधानेष्वदीक्षिताः॥

इत्याशासाना अत्रैव विरतिमभ्यर्थयामहे। इति शिवं भूयात्॥